পিতরা মাতরা যুবমা মা সোমো অমৃতত্বায় গম্যাদিতি। অস্যার্থঃ। বাজস্য শ্রাদ্ধদত্তান্নস্য প্রসবঃ ফলং মা মাং আ জগম্যাৎ পুনঃ পুনরাগচ্ছতু। ইমে দ্যাবাপৃথিবী মা মাং জগম্যোতাং পুনঃ পুনরাগচ্ছতাং কিম্ভূতে দ্যাবাপৃথিবী বিশ্বরূপে বিশ্বং জগৎ তদেব রূপং যয়োস্তে বিশ্বরূপে এতেন দ্যাবাপৃথিবীসম্বন্ধি যৎ কল্যাণফলং তৎ মা মা গচ্ছত্বিত্যাশংসা। কিঞ্চ হে মে মম পিতরা মাতরা পিতরৌ যুবং যুবাং মা মাং আগন্তং আগচ্ছতং যদা যদা শ্রাদ্ধং করোমি তদা তদা মম মাতাপিতরা-বাগচ্ছতামিত্যর্থঃ। যুবমিতি প্রথমাদ্বিবচনে ভাষায়ামিতি সূত্রে ভাষাগ্রহণাচ্ছন্দসি আকারো ন ভবতি। আগন্তমিতি ছান্দসত্বাচ্ছামঃ ন শপ্‌লোপঃ ছকারলোপশ্চ

প্রেভ্যো দদ্যাৎ। অগ্নৌ জলে বা ক্ষিপেৎ। শ্রাদ্ধীয় দ্রব্যং ব্রাহ্মণায় দদ্যাৎ জলে বা ক্ষিপেৎ। ততঃ উপবীতী সপুষ্প জলং গৃহিত্বা মহাবামদেব্যঋষির্বিরাড় গায়ত্রীচ্ছন্দ ইন্দ্রো দেবতা শান্তিকর্ম্মণি জপে বিনিয়োগঃ। ওঁ কয়া নশ্চিত্র আভুবদূতী সদাবৃধঃ সখা কয়া সচীষ্ঠয়াবৃতা ওঁ কস্ত্বা সত্যো মদানাং মংহিষ্ঠো মৎসদন্ধসঃ দৃঢ়া চিদা রুজে বসু। ওঁ অভীষুণঃ সখীনাম-বিতা জরিতৄণাং শতম্ভবা স্যূতয়ে (২৬)। ইতি ত্রিঃ পঠিত্বা ওঁ স্বস্তি ন ইন্দ্রো বৃদ্ধশ্রবাঃ স্বস্তি নঃ পূষা বিশ্ববেদাঃ স্বস্তি নস্তার্ক্ষোঽরিষ্টনেমিঃ স্বস্তি নো বৃহস্পতির্দধাতু। ইতি ত্রিঃ পঠেৎ। ততোঽচ্ছিদ্রবধারণম্। ততো দক্ষিণপাণিনা দীপং প্রচ্ছাদ্য

নিকফলফলাৎ। কিঞ্চ পিতৃণাং সোমো রাজা মা মাং আগম্যাৎ আগচ্ছতু। কিমর্থং অমৃতত্বায় মোক্ষায় তদেবং শ্রাদ্ধং কৃত্বা বিসর্জ্জিতেষু বিপ্রেষু অনুব্রজনে ক্রিয়মাণে শ্রাদ্ধফলং পার্থিবসুখং স্বর্গসুখঞ্চ মম ভবতু মোক্ষশ্চ ভবত্বিত্যর্থঃ। প্রজানিঃশ্রেয়সার্থমিত্যাপস্তম্বেন শ্রাদ্ধস্য মোক্ষফলত্বাভিধানাৎ। দ্যাবাপৃথিবী ইতি দ্যৌশ্চ পৃথিবী চ ছান্দসত্বাৎ ন দ্বিবচনম্ আজগম্যাদিতি গমের্যঙলুগন্তাৎ লিঙ্ ছান্দসত্বান্নাভ্যাসাগমঃ। আগন্তং ব্যবহিতেনাঙাসম্বন্ধঃ। মাতাপিতরাবিত্যর্থে নিপাতনাদাত্বম্।
(৩৬) কয়ানশ্চিত্র, কস্ত্বাসত্যঃ, অভীষুণঃ সখীনাং স্বস্তি ন ইন্দ্র ইত্যাদি গায়ত্র্যশ্চতস্র ইন্দ্রদেবতাকাঃ শান্তিকর্ম্মণি বিনিযুক্তাঃ। মহাবামদেব্যদৃষ্টাঃ। চিত্রে চয়নকর্ম্মণি

প্রয়োজক ইন্দ্রঃ কয়া ঊতি ঊতা। কেন তর্পণেন নো ঽস্মাকং সদাবৃধঃ সর্ব্বদা বৃদ্ধিকারী আভুবৎ ভূয়াৎ। কয়া চাবৃতা ক্রিয়য়া বা মিত্রে চ নঃ সখা মিত্রং আভুবৎ কিম্ভূতয়া বৃতা সচীষ্টয়া কর্ম্মণো নাম। ইষ্টয়া অতিশয় কর্ম্মবত্যা কেন তর্পণেন কয়া ক্রিয়য়া পরিপাট্যা। ইন্দ্রো নো ঽস্মাকং বৃদ্ধিকারী সখা চ ভূয়াদিতি প্রশ্নো বাক্যার্থঃ। ত্বয়া কথিতে বয়ং তদন্থতিষ্ঠামঃ পূর্ব্বমনেন নবতিরাহুতিভিঃ সিক্ত ইতি তৎপ্রিয়োঽপ্যয়ং মন্ত্রঃ। ঊতীতি কৃতিজূতিযূতীত্যাদিনা ক্তিন তৃতীয়ৈক-বচনং সুপাং লুগিত্যাদিনা পূর্ব্বসবর্ণঃ আভুবদিতি লিঙ্গার্থে লোট্ আটাটাবিত্যটধাতোকবড়িরশ্চ ইত্যাদিনা উকারলোপশ্ছান্দসঃ। বৃধ ইতি ইগুপধে প্রাজ্ঞেত্যা-দিনা কঃ। হে ইন্দ্র কঃ কো রসস্ত্বা ত্বাং মৎসৎ মত্তং করোতি কর্ম্ম রসঃ অন্ধসঃ অন্নস্য সোমস্যেতি যাবৎ। কিম্ভূতো রসঃ সত্যঃ সোমযোগে ক্রিয়মাণে ঽবশ্যম্ভাবী পুনঃ কিম্ভূতঃ মদানাং স্বরাণাং মধ্যে মংহিষ্ঠো অতিশয়েন মদজনকঃ যেন মদেন মত্তস্তং বস্থ বসূনি ধনানি আরুজে ভঞ্জয়সি ত্বয়া কথিতে বয়ং তদন্থতিষ্ঠামঃ মংহিষ্ঠ

হস্তৌ প্রক্ষাল্যাচম্য কৃতৈতৎ পার্ব্বণশ্রাদ্ধকর্ম্মাচ্ছিদ্রমস্তু ইত্যবধারয়েৎ। ওঁ অদ্যেত্যাদি কৃতৈতৎপার্ব্বণশ্রাদ্ধকর্ম্মণি যদ্বৈগুণ্যং জাতং তদ্দোষপ্রশমনায় বিষ্ণুস্মরণমহং করিষ্যে ইতি সংকল্প ওঁ তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সূরয়ঃ। দিবীব চক্ষুরাততম্ ২৮২

ইতিমহি বৃদ্ধৌ দৃজন্তাচ্ছন্দসীতি ইষ্ঠন্ ভূরিষ্ঠো মেয়ঃস্থিতি দৃচো লোপঃ। মদিতি মদি হর্ষোণ্যন্তাৎ লেট্ তিপ্ সি বহুলং লেটিতি সিপ্ সিলোপঃ। দৃঢাচিদিতি শেশ্ছান্দসি বহুলমিতি শসঃ শের্লোপ আরুজে ইতি তিঙাং তিঙো ভবন্তীতি সিপস্থানে উত্তমপুরুষৈকবচনমিট্ বস্থিতি সুপাং সুপলুগিতি শসো লুক্। হে ইন্দ্র নো ঽস্মাকং সখীনাং মিত্রাণাং তথা জরিতৃণাং স্তোতৃণাং অবিতা পালয়িতা ভবাসি ভব। ছন্দসি দীর্ঘঃ অভি আভিমুখ্যেন তথা সুষ্ঠু যথা স্যাৎ কিম্ভূতঃ সন শতং স্বয়ং শতধা ভূদ্বেত্যর্থঃ। কিমর্থমবিতা ভবাসি উতয়ে বহুপ্রকাররক্ষণায় অভীষুণ ইতি ইকঃ সুঞিতি দীর্ঘঃ সুঞ ইতি যত্বং ণত্বঞ্চ ধাতুভ্যো বহুভ্য ইতি ণত্বং ভবাসীতি লেট আট্ধাতূনামনেকার্থত্বাৎ। জীর্য্যতেঃ স্তুতিরর্থঃ। নঃ নোঽস্মভ্যং ইদং স্বস্তি শান্তিং দদাতু কিম্ভূতঃ বৃদ্ধশ্রবা বৃদ্ধানাং শৃণোতীতি স্তন্ বৃদ্ধবাক্যশ্রবণকারী তথা পূষা বিশ্ব-বেদা সর্ব্বজ্ঞঃ। তথা তার্ক্ষ্যো গরুড়ঃ অরিষ্টনেমিঃ অব্যাহতগতিপ্রসরঃ তথা বৃহস্পতিঃ স্বস্তি নো দধাতু ততশ্চতস্রো গায়ত্র্যাস্ত্রিধাবর্ত্তয়িতব্যা ইতি গৃহ্যম ॥ * ॥

ইত্যনেন বিষ্ণুং স্মরেৎ। যাত্রা যুদ্ধং নদীপারং পুনঃ স্নানং দ্বিভোজনং। দ্যূতক্রিড়াং রতিং নার্য্যাঃ শ্রাদ্ধং কৃত্বাষ্ট বর্জয়েৎ। ততো বৈশ্বদেব বলিকর্ম্মণী কুর্য্যাৎ ইতি ॥ * ॥ ॥ * ॥ * ॥

নিত্যশ্রাদ্ধকরণাকরণয়োর্বিকল্পঃ। শ্রাদ্ধশেষমিষ্টৈঃ সহ ভুঞ্জীত উপবাসদিবসে শেষসত্ত্বে তদ্‌ঘ্রাণং। পিত্রাদি ত্রিষু জীবতসু শ্রাদ্ধং ন কর্ত্তব্যং। মতামহাদি ত্রিষু জীবৎসু পিত্রাদিত্রিক শ্রাদ্ধং কর্ত্তব্যং। ষণ্ণাং পুরু-ষাণাং মধ্যে যো যো জীবতি তং বিহায় পুরুষান্তরমাদায় শ্রাদ্ধং কর্ত্তব্যং। এবমেব দ্বাদশ মাসেষমাবাস্যায়াং চতু-র্দ্দশী বর্জং কৃষ্ণপক্ষীয়ায়াং যস্যাং কস্যাঞ্চিত্তিথৌ বা শ্রাদ্ধং কর্ত্তব্যং। তত্র পর্ব্বেতর তিথিষু পার্ব্বণবিধিনা শ্রাদ্ধমিতি বাক্যে বিশেষঃ। দ্বাদশাশক্তৌ কন্যাকুম্ভ বৃষস্থে হর্কে তদশক্তৌ কন্যার্কে তদশক্তৌ তুলার্কে তত্রাপ্যশক্তৌ দীপান্বিতামাবাস্যায়াং। অশ্বযুক্ কৃষ্ণপক্ষীয় প্রতিপদাদি পঞ্চদশসু ষষ্ঠ্যাদি দশসু একাদশ্যাদি পঞ্চসু ত্রয়োদশ্যাদি তিসৃষু তিথিষু ফলতারতম্যার্থিনা শ্রাদ্ধং কর্ত্তব্যং। পৌর্ণমাস্যন্ত পৌষ মাঘ ফাল্গুন কৃষ্ণাষ্টমীষু পূপমাংসশাকৈর্যথাক্রমং পার্ব্বণবিধিনা শ্রাদ্ধং কর্ত্তব্যং। তান্যুপকরণত্বেন অন্নঞ্চ প্রধানং। মাংসঞ্চ পশোরেব তদভাবে পায়সেন। অঙ্গাভাবে প্রধাননির্ব্বাহার্থং আমান্নাদিনাপি শ্রাদ্ধং কার্য্যং। আশ্বিন শুক্লপক্ষে ব্রীহিযবান্নেন শ্রাদ্ধং কার্য্যং। তদসম্ভবে বৃশ্চিক শুক্লপক্ষে শালিনবান্নেন নবান্নাভাবে পুরাতনেনাপি। তত্রাশক্তৌ মকরকুম্ভার্কে শুক্লপক্ষ এব মৃগনেত্রাসু ন কুর্য্যাৎ। এবং মেষার্কে যবনবান্নাগমননিমিত্তক পার্ব্বণ শ্রাদ্ধং কার্য্যং। তত্রা শক্তৌ হরিশয়নাৎ পূর্ব্বং। অশ্বযুক্ কৃষ্ণপক্ষীয় ত্রয়োদশ্যাং মঘাযুক্তায়াং পক্ষশ্রাদ্ধাকারিণাপি শ্রাদ্ধং কর্ত্তব্যং। তত্রা-

বিভক্তৈরপি ভ্রাতৃভিঃ পৃথক্ শ্রাদ্ধং কর্ত্তব্যং। তত্র পুত্রবতা পিণ্ডা ন দেয়াঃ। তত্রান্নবিকিরণীয় মধুমধুমধ্বিতি জপান্তং কৃত্বা পিণ্ডেতি
কর্ত্তব্যতাং পরিত্যজ্য ওঁ সুসুপ্রোক্ষিতমস্ত্বিত্যাদিকং কুর্য্যাৎ। যদি পক্ষশ্রাদ্ধমারব্ধং তদাপ্যপিণ্ডক শ্রাদ্ধেনাপি তৎসিদ্ধিঃ। এবং
প্রেতপক্ষাদি মৃতস্য পিতুঃ পার্ব্বণবিধিনা সাংবৎসরিক শ্রাদ্ধে কৃতে পক্ষে শ্রাদ্ধসিদ্ধিঃ। এবমবিভক্ত সাপত্ন ভ্রাত্রোরেকেণ পার্ব্বণে
কৃত পক্ষ শ্রাদ্ধসিদ্ধিঃ। আর্দ্রাস্থরবৌ নবোদক শ্রাদ্ধং কর্ত্তব্যং। এবং শ্রাবণ্যাং মাঘ্যাং শ্রাদ্ধং কর্ত্তব্যং। অমাবস্যাশ্রাদ্ধস্য তু
তিথি দ্বৈধে যদ্দিনে একাদশ দ্বাদশ মুহূর্ত্তয়োস্তদন্যতরস্মিন্ বা অমাবস্যালাভস্তদ্দিনে শ্রাদ্ধং কর্ত্তব্যং। উভয় দিনে তথা লাভে
পূর্ব্বদিবসীয় চতুর্দ্দশ্যাপেক্ষয়া অমাবস্যা ক্ষীয়মাণা তদা পূর্ব্বদিনে কর্ত্তব্যং। যদি বর্দ্ধমানা তদা পরদিনে যদি স্তম্ভিতা তদা ঋগ্বে-
দিনাং পূর্ব্বদিনে যজুর্ব্বেদিনাং পরদিনে সামবেদিনাং যথেচ্ছয়া। যথা পূর্ব্বদিনে মুহূর্ত্তত্রয়ব্যাপিনী পরদিনে একাদশ মুহূর্ত্তব্যাপি ২৮৪
নী তদা পরদিনে শ্রাদ্ধং। যদা তু পূর্ব্বদিনে মুহূর্ত্তত্রয়ব্যাপিনী পরদিনে দশম মুহূর্ত্তব্যাপিন্যপি তদা পূর্ব্বদিনে শ্রাদ্ধং। যদা তু পূর্ব্ব-
দিনে কিঞ্চিদধিক মুহূর্ত্তত্রয়ব্যাপিনী পরদিনে কিঞ্চিদধিক দশম মুহূর্ত্তব্যাপিনী তদাসাগ্নেশ্চতুর্দ্দশ্যাং নিরগ্নেশ্চ পরদিনে অমা-
বস্যায়াং শ্রাদ্ধং। অগ্রহায়ণ জ্যৈষ্ঠয়োস্তূভয়দিন লাভে ক্ষীণপক্ষেপি পরদিনে মলমাস যুতাব্দে তু তয়োরপি পূর্ব্বদিনে কর্ত্তব্যত্বং
অমাবস্যায়ৃত মাতাপিত্রোস্ত্রিদৈবত পার্ব্বণে সপিণ্ডীকরণে বা ন ক্ষীণাদিনা ব্যবস্থা কিন্তু তিথ্যন্তর কর্ত্তব্যবদ্ব্যবস্থা। যদা তু এক-
স্মিন্নেব দিনে ত্রৈপুরুষিকষাট্পুরুষিকয়োঃ শ্রাদ্ধ প্রাপ্তিস্তদা ত্রৈপুরুষিকং কর্ত্তব্যং ন তু ষাট্পুরুষিকমিতি। অমাবস্যেতরা-
পরাহ্ণিক শ্রাদ্ধস্য তু যদ্দিনে মুখ্যাপরাহ্ণে তিথি লাভস্তদ্দিনে কর্ত্তব্যতা উভয়ত্র মুখ্যাপরাহ্ণয়োস্তিথিলাভে পূর্ব্বদিনে কর্ত্তব্যতা। উভ-

য়োস্তিথ্যলাভে গৌণাপরাহ্ন লাভাৎ পরদিনে শুক্লপক্ষে তত্তিথি বিশেষবিহিত পার্ব্বণস্যোভয় দিবসীয় সঙ্গবয়োস্তত্তিথি লাভে
পরদিনে শ্রাদ্ধং। পূর্ব্বদিবসীয় সঙ্গবে রোহিণ্যন্তু গৌণ পূর্ব্বাহ্নে বা অপরাহ্নবিহিতাষ্টকা শ্রাদ্ধস্য তু তিথিদ্বৈধে পূর্ব্বদিন এব। গ্রহণ
সংক্রান্তি শ্রাদ্ধয়োরাত্রাবপি কর্ত্তব্যতা। যুগাদ্যা শ্রাদ্ধন্তু পূর্ব্বাহ্নে এব। অমাবস্যা ২পরপক্ষ মৃতস্য তু. শ্রাদ্ধস্যাপ্যয়ং বিশেষঃ। দৈবে
ব্রাহ্মণমেকং পিত্রাদিত্রয়াণাং ব্রাহ্মণত্রয়মেকং বা মাতৃ শ্রাদ্ধে তু মাতৃ পিতামহী প্রপিতামহীনাং তিসৃণামেকং ব্রাহ্মণং স্থাপয়েৎ।
অনুজ্ঞা বাক্যে তু ওঁ অদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণো ২মাবস্যাক্ষয় নিমিত্তক পার্ব্বণ বিধিক সাংবৎসরিক
শ্রাদ্ধার্থং অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণো ২মুক গোত্রস্য পিতামহস্যামুক দেবশর্ম্মণো ২মুক গোত্রস্য প্রপিতামহস্যামুক
দেবশর্ম্মণঃ পার্ব্বণবিধিক শ্রাদ্ধে কর্ত্তব্যে পুরূরবো মাদ্রবসোর্বিশ্বেষাং দেবানাং পার্ব্বণবিধিক সাংবৎসরিক শ্রাদ্ধং দর্ভময় ব্রাহ্মণে 
২হং করিষ্যে। ওঁ কুরুষ্বেতি প্রতিবচনং। ততঃ পিত্র্যে ওঁ অদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণো ২মা-
বস্যাক্ষয়নিমিত্তক পার্ব্বণ বিধিক সাংবৎসরিক শ্রাদ্ধার্থং অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণো ২মুক গোত্রস্য পিতামহস্যামুক
দেবশর্ম্মণো ২মুক গোত্রস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ পার্ব্বণবিধিনা সাংবৎসরিক শ্রাদ্ধং দর্ভময় ব্রাহ্মণে ২হং করিষ্যে।
ওঁ কুরুষ্বেতি প্রতিবচনং। অত্র মাতামহানাং শ্রাদ্ধং নাস্তি। কর্ষূ সমন্বিতং ত্যক্তা তথাদ্যং শ্রাদ্ধষোড়শং। প্রত্যাব্দিকঞ্চ শেষেষু
পিণ্ডাঃ স্যুঃ ষড়িতি স্থিতি রিতি বচনাৎ। মাতৃশ্রাদ্ধেপ্যেবং তিসৃণাং শ্রাদ্ধানুজ্ঞা বাক্যং কুর্য্যাৎ। ত্যাগ বাক্যে তু ন যেচাত্রত্বেতি
মন্ত্রঃ প্রযোক্তব্যো ২সমবেতার্থত্বাৎ কিন্তু শৌদত্তাদ্যুক্তান্বষ্টকায়াং অমুক গোত্রে মাতরমুকি দেবি অমুক গোত্রে পিতামহি

অমুকি দেবি অমুক গোত্রে প্রপিতামহি অমুকি দেবি এতত্তে দর্ভাসনং স্বধেতি এবং ক্রমেণ দদ্যাৎ। এবং দক্ষিণাবাক্যেপি অমাবস্যাক্ষয়নিমিত্তকোক্ত নিমিত্তমুল্লেখ্যং সর্ব্বত্র দক্ষিণা কর্ত্তব্যম্ ॥ * ॥ * ॥ * ॥

॥ * ॥ ইতি পার্ব্বণ শ্রাদ্ধ প্রয়োগ তত্ত্বং সমাপ্তং ॥ * ॥

অথ নান্দীমুখশ্রাদ্ধম্। তত্র প্রাতঃ সুস্নাতঃ কৃতনিত্যক্রিয়ঃ প্রাঙ্মুখঃ সুপ্রক্ষালিতপাণিপাদঃ কৃতাচমনো গোময়োপলিপ্তে দেশে প্রাবৃতে উপবিশ্য তিলতৈলেন ঘৃতেন বা দীপং প্রজ্জ্বাল্য শালগ্রামে জলে বা বিষ্ণুং সংপূজ্য যদি পূর্ব্বদিনে অধিবাসং ন কৃতং তদা অস্মিন্ সময়ে এতৎ পূর্ব্বোক্তবিধিনা অধিবাসং কৃত্বা ব্রাহ্মণান্ স্বস্তি বাচয়িত্বা ওঁ তৎসদিদত্যুচ্চার্য্য কুশত্রয়তিলফলপুষ্পতুলসী দূর্ব্বাজলপূর্ণপাত্রং যথা লাভোপপন্নং বা গৃহীত্বা ওঁ অদ্যেত্যাদি অমুকে মাসি অমুক রাশিস্থে ভাস্করে অমুক পক্ষে অমুক তিথৌ অমুক গোত্রস্যামুক দেবশর্ম্মণো হমুক কর্ম্মাভ্যুদয়ার্থং সগণাধিপ গৌর্য্যাদি ষোড়শ মাতৃকাপূজা বসোর্ধারাসম্পাতনায়ুষ্যসূক্তজপাভ্যুদয়িক শ্রাদ্ধান্যহং করিষ্যে ইতি সংকল্প্য তজ্জলমৈশান্যাং দিশি ক্ষিপেৎ। স্বীয়কর্ম্মণি তু অমুক গোত্রস্যেত্যাদৌ প্রথমান্তেন প্রয়োগঃ। ততঃ প্রাঙ্মুখঃ সপ্তদশ যবপুঞ্জেষু প্রত্যেকং গণপতি গৌরী পদ্মা শচী মেধা সাবিত্রী বিজয়া জয়া দেবসেনা স্বধা স্বাহা শান্তি পুষ্টি ধৃতি তুষ্ট্যাত্মদেবতাকুলদেবতাঃ পূজয়েৎ। যথা সপুষ্পাক্ষতমাদায় ওঁ গণপতিমহমারোপয়ামি ওঁ ভুর্ভুবঃ স্বর্গণপতে ইহাগচ্ছ ইহাগচ্ছ ইহ তিষ্ঠ ইহ তিষ্ঠ ইত্যুক্ত্বা পঞ্চোপচারেণ অশক্তৌ গন্ধপুষ্পাভ্যাং বা ওঁ গণপতয়ে নমঃ

ইত্যনেন পূজয়েৎ। ক্ষমস্ব ইতি বিসর্জ্জয়েৎ। গৌর্য্যাদি পূজনে তু ওঁ গৌরীং মাতরমহমারোপয়ামি ওঁ ভূর্ভুবঃ স্বঃ গৌরি
মাতরিহাগচ্ছ ইহাগচ্ছ ইহ তিষ্ঠ ইহ তিষ্ঠ ইত্যাবাহ্য ওঁ গৌর্য্যৈ মাত্রে নমঃ। ইতি ক্রমেণ সংপূজ্য ক্ষমস্বেতি বিসর্জ্জ-
য়েৎ। ততো গোময়োপলিপ্তায়াং ভিত্তৌ প্রাঙ্মুখ উদঙ্মুখো বা উপবিশ্য ওঁ যদ্বর্চ্চো হিরণ্যস্য যদ্বা বর্চ্চো গবামুত। সত্যস্য
ব্রহ্মণো বর্চ্চস্তেন মা সংসৃজামসি। ইতি সামবেদোক্ত মন্ত্রেণ সপ্ত পঞ্চ বা ধারাঃ ঘৃতেন দদ্যাৎ। দ্বারস্য দক্ষিণে দেশে
ভিত্তৌ নাভি প্রমাণে স্থানে ঘৃতধারাং দদ্যাৎ। ততস্তাসু ধারাসু ওঁ চেদিরাজবসো ইহাগচ্ছ ইহাগচ্ছ ইত্যনেনাবাহ্য ওঁ চেদি-
রাজবসবে নমঃ। ইত্যনেন গন্ধাদিভিঃ সংপূজ্য ওঁ চেদিরাজ নমস্তভ্যং শাপগ্রস্ত মহামতে। ক্ষুৎপিপাসানুদে দাস্ত চেদিরাজ
নমো হস্ত তে ইতি প্রণম্য ওঁ চেদিরাজবসো ক্ষমস্বেতি বিসর্জ্জয়েৎ। তত আয়ুষ্যমন্ত্রজপঃ। ওঁ আয়ুর্ব্বিশ্বায়ুর্ব্বিশ্বং বিশ্বমায়ুরসী-
মহি প্রজাস্তৃষ্টরধিনিধেহ্য স্মৈ শতং জীবেম শরদো বয়ং তে। ওঁ আয়ুষো মে পবস্ব বর্চ্চসো মে পবস্ব বিদুঃ পৃথিব্যা দিবো
জনিত্র্যা শৃণ্বন্ত্বাপো হধঃ ক্ষরন্তী সোমো হোদগায় মমায়ুষে। মম ব্রহ্মবর্চ্চসায় যজমানস্যার্দ্ধ্যা অমুষ্য রাজ্যায়। অমুষ্য স্থানে যদর্থং
বৃদ্ধিঃ ক্রিয়তে তস্য ষষ্ঠ্যন্তং নাম প্রয়োক্তব্যম্। তত আচম্য পূর্ব্ববৎ ভোজ্যোৎসর্গং কৃত্বা ওঁ বাস্তুপুরুষায় নমঃ। ইতি
বাস্তুং সংপূজ্য বিষ্ণুং স্মৃত্বা ওঁ তৎসদিত্যুচ্চার্য্য ওঁ যজ্ঞেশ্বরায় বিষ্ণবে নমঃ। ইতি যজ্ঞেশ্বরং সংপূজ্য শ্রাদ্ধীয়াগ্রভাগং ২৮৭
দদ্যাৎ। তত আচারাৎ গঙ্গাং সংপূজ্য পরকীয় ভূমৌ চেৎ তৎস্বামিনে মূল্যমথবা ইদমন্নং ওঁ এতদ্ভূস্বামি পিতৃভ্যো নমঃ। ইতি
শ্রাদ্ধীয়াগ্রভাগং দদ্যাৎ। অত্র দেবপক্ষে প্রাঙ্মুখঃ পিতৃপক্ষে হপি প্রাঙ্মুখঃ উভয়ত্রোপবীতী পাতিতদক্ষিণ জানুঃ ঋজুকুশত্রয়েণ

যবোদকেন দেবতীর্থেন কুর্য্যাৎ। ততঃ দৈবে পশ্চিমদেশে যবোদকপ্রোক্ষিত প্রাগগ্রদর্ভদ্বয়যুক্তাসনদ্বিতয়ে প্রাঙ্মুখং দর্ভবটুদ্বিতয়ং সংস্থাপ্য দক্ষিণাবর্ত্তেন দক্ষিণাং দিশমাগত্য প্রাঙ্মুখৈকদর্ভযুক্তোদঙ্মুখাসনদ্বিতয়ে উদঙ্মুখং দর্ভবটুদ্বিতয়ং নিধায় তৎপশ্চিম দিশি উক্তরূপেণ দর্ভযুক্তাসনদ্বিতয়ে মাতামহসম্বন্ধিদর্ভবটুদ্বয়ং নিধায় দৈবে জলগণ্ডূষং দত্ত্বা ওঁ অদ্যামুকে মাস্যমুক রাশিস্থে ভাস্করে অমুক পক্ষে হমুক তিথৌ অমুক গোত্রস্য শ্রী অমুক দেবশর্ম্মণঃ শুভামুক কর্ম্মাভ্যুদয়ার্থং অমুক গোত্রস্য নান্দীমুখস্য পিতরমুক দেবশর্ম্মণঃ অমুক গোত্রস্য নান্দীমুখস্য পিতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য নান্দীমুখস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য নান্দীমুখস্য মাতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য নান্দীমুখস্য প্রমাতামহস্য অমুক দেবশর্ম্মণঃ অমুক গোত্রস্য নান্দীমুখস্য বৃদ্ধপ্রমাতামহস্যামুক দেবশর্ম্মণঃ আভ্যুদয়িক শ্রাদ্ধে কর্ত্তব্যে ওঁ বসুসত্যয়োর্বিশ্বেষাং দেবানামাভ্যুদয়িক শ্রাদ্ধং দর্ভময় ব্রাহ্মণয়োরহং করিষ্যে ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেতি প্রতিবচনম্। স্বীয় কর্ম্মণি তু অমুক গোত্রস্যোত্যত্র প্রথমান্তেনোহঃ। ততঃ প্রদক্ষিণেন গত্বা পিতৃপক্ষে জলগণ্ডূষং দত্ত্বা ওঁ অদ্যামুকে মাস্যমুক রাশিস্থে ভাস্করে অমুক পক্ষে হমুক তিথৌ অমুক গোত্রস্যামুক দেবশর্ম্মণঃ শুভামুক কর্ম্মাভ্যুদয়ার্থং অমুক গোত্রস্য নান্দীমুখস্য পিতুরমুক দেবশর্ম্মণো হমুক গোত্রস্য নান্দীমুখস্য পিতামহস্যামুক দেবশর্ম্মণো হমুক গোত্রস্য নান্দীমুখস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ আভ্যুদয়িক শ্রাদ্ধং দর্ভময় ব্রাহ্মণয়োরহং করিষ্যে ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেতি প্রতিবচনম্। এবং মাতামহপক্ষে হপি। ততো দৈবাদি ক্রমেণ সপ্রণবব্যাহৃতিকাং গায়ত্রীং জপ্ত্বা ওঁ দেবতাভ্যঃ পিতৃভ্যশ্চ মহাযোগিভ্য এব চ। নমঃ পুষ্ট্যৈ স্বাহায়ৈ নিত্যমেব ভবন্ত্বিতি। ইতি ত্রিঃ পঠেৎ।

ওঁ নমো গণেশায়। তন্ত্রভাষ্যং সমালোক্য যজ্ঞবিদ্যাসশেষতঃ। নিখিল শ্রাদ্ধমন্ত্রাণাং ব্যাখ্যেয়ং ক্রিয়তে ময়া। অথ নান্দীমুখশ্রাদ্ধম্। তত্র কুশাসনদানানন্তরং (১) বিশ্বান্ দেবানাহ্বয়িষ্যে ইতি পৃচ্ছেৎ। আবাহয়েত্যনুজ্ঞাতঃ। ওঁ বিশ্বেদেবাস আগত ইত্যনয়া ঋচাবাহয়েদিতি কাত্যায়নঃ। (২) মন্ত্রো যথা ওঁ বিশ্বেদেবাস আগত শৃণুতা ম ইদং হবং ইদঃ বর্হির্নিষীদত। অস্যার্থঃ। হে বিশ্বেদেবাস যূয়ং মে ইমং হবং আহ্বানং শৃণুতা শৃণুত শ্রুত্বা চ আগত আগচ্ছত আগত্য চ ইদং বর্হিঃ কুশং

(৩৭) ॥ ● ॥ নান্দীমুখশ্রাদ্ধম্ ॥ ● ॥

ততঃ পুণ্ডরীকাক্ষং স্মৃত্বা যবজলেন শ্রাদ্ধীয় দ্রব্যং সংপ্রোক্ষ্য রক্ষার্থমুদকপাত্রমেকদেশে স্থাপয়েৎ। ততো দৈবে ব্রাহ্মণহস্তে জলং দত্ত্বা কুশত্রয়মাদায় ওঁ বসুসত্যৌ বিশ্বেদেবা এতদ্বো দর্ভাসনং নমঃ। ইতি ঋজুদর্ভান্ দেবব্রাহ্মণদক্ষিণপার্শ্বে দদ্যাৎ। ততঃ পিতৃপক্ষে ব্রাহ্মণ হস্তে জলং দত্ত্বা ঋজু কুশত্রয়েণ ওঁ অমুক গোত্র নান্দীমুখ পিতরমুক দেবশর্ম্মন্নমুক গোত্র নান্দীমুখ প্রপিতামহমুক দেবশর্ম্মন্নেতত্তে দর্ভাসনং। ওঁ যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে নমঃ। ইতি ঋজুদর্ভান্ পিতৃব্রাহ্মণবামপার্শ্বে দদ্যাৎ। এবং মাতামহ- ২১৯
পক্ষেঽপি। ততো দৈবে যবান্ গৃহীত্বা ওঁ বিশ্বান্ দেবান্ আবাহয়িষ্যে [১]। ইতি পৃচ্ছেৎ। ওঁ আবাহয়েত্যুক্তরম্ ওঁ বিশ্বে-দেবাস আগত শৃণুতা ম ইমং হবম্ ইদং বর্হির্নিষীদত। (২) ইত্যাবাহ্য তুষ্ণীং যবান্ বিকিরেৎ। ততঃ কৃতাঞ্জলিঃ। ওঁ বিশ্বেদেবাঃ শৃণুতেমং হবং যে মে অন্তরীক্ষে যে উপদ্যবিষ্ঠ যে অগ্নিজিহ্বা উত বা যজত্রা আসাদ্যাস্মিন্ বর্হিষি মাদয়ধ্বম্ [৩]।

নিষীদত আসনার্থমুপকল্পিতে বর্হিষি উপবিষ্টা ভবত ইত্যর্থঃ। অত্র বিশ্বেদেবাস ইতি অর্জ্জসেরসুগিতি অসুগাগমঃ। [শৃণুতা ইতি শৃণুত ইত্যর্থঃ তস্য তা ইতি তস্য স্থানে তাদেশঃ। আগত ইতি আগচ্ছত ইত্যস্মিন্নর্থে বর্ণাগমো বর্ণবিপর্য্যয়শ্চেতি নিরুক্ত লক্ষণেন ছকারলোপঃ। ইদং বর্হিরিতি সপ্তম্যর্থে দ্বিতীয়া কর্ম্মপ্রবচনীয়ত্বাৎ। (৩) ততো

যববিকীরণানন্তরং অবকীর্য্য বিশ্বেদেবাঃ শৃণুতেতি জপেদিতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ বিশ্বে দেবাঃ শৃণুতেমং হবং যে মে হন্তরীক্ষে য উপ দ্যবি ষ্ঠ যে অগ্নিজিহ্বা উত বা যজত্রা আসাদ্যাস্মিন্ বর্হিষি মাদয়ধ্বং। অস্যার্থঃ। হে বিশ্বে দেবা মে মম ইমং হবং আহ্বানং শৃণুত কিম্ভূতা যূয়ং অন্তরীক্ষে আকাশেষ্ঠ তিষ্ঠত তথা যে উপ সমীপে পৃথিব্যাং তিষ্ঠত দ্যবি স্বর্গে বে তিষ্ঠতেতি সম্বন্ধঃ। দ্যবিষ্ঠেতি ছান্দসত্বাৎ যত্বম্। এতদুক্তং ভবতি। ভূমাবাকাশে স্বর্গে চাবস্থিতা যে বিশ্বেদেবাঃ। কে তে অগ্নিজিহ্বা অগ্নিরেব জিহ্বা হুতভোজনসাধনং যেষাং তে তথোক্তাঃ। উত বা অপ্যর্থে যে যজত্রাঃ যজন্তং শ্রাদ্ধকর্ত্তারং ত্রায়ন্ত ইতি যজত্রাঃ। পুরূরবো মাদ্রবঃ প্রভৃতয়ঃ যূয়ং আস্তৃতে কুশে আসাদ্য মাদয়ধ্বং হর্ষযুক্তা ভবেতেত্যর্থঃ। (৪) ওঁ ওষধয়ঃ সমবদন্ত সোমেন সহ রাজ্ঞা যস্মৈ কৃণোতি ব্রাহ্মণস্তং রাজন্ পারয়ামসি। অস্যার্থঃ। হে বিশ্বে-

ওঁ ওষধয়ঃ সমবদন্ত সোমেন সহ রাজ্ঞা যস্মৈ কৃণোতি ব্রাহ্মণস্তং রাজন্ পারয়ামসি [ ৪ ]। ইতি জপেৎ। ততঃ পিত্রে যবান্ গৃহীত্বা ওঁ নান্দীমুখান্ পিতৄনাবাহয়িষ্যে ইতি পৃচ্ছেৎ। ওঁ আবাহয়েত্যুত্তরম্। ওঁ এত নান্দীমুখাঃ পিতর সোম্যাসো গম্ভীরেভিঃ পথিভিঃ পূর্ব্বিণেভির্দ্দত্তাস্মভ্যং দ্রবিণেহ ভদ্রং রৈঞ্চ নঃ সর্ব্ববীরং নিযচ্ছত [ ৫ ]। ওঁ উশন্তস্ত্বা নিধীমহ্যুশন্তঃ সমিধীমহি 

দেবাস ন কেবলং যূয়মেব হর্ষযুক্তাঃ কিন্তু ভবদধিষ্ঠানযুক্তমাত্মানং বহুমন্যমানা ওষধয়ঃ কুশাঃ সোমেন সহ রাজ্ঞা সহাসীনাঃ সমবদন্ত স্থিরীভূতাঃ যতঃ সোমঃ ওষধীনামধিপতিঃ। কিঞ্চ হে সোম রাজন্ ত্বং ব্রাহ্মণো হসি ভবসি অতো যস্মৈ ব্রাহ্মণায় শ্রাদ্ধভোক্তৃত্বেনোপকল্পিতায় আসনং কুশান্তরেণ সম্বদ্ধং কৃণোতি দধাতি তং ব্রাহ্মণমপি আং সর্ব্বতো ভাবেন পারয় শ্রাদ্ধভোজনকৃতপাপম্মোচয় ইত্যধ্যাহার্য্যং। কৃণোতীতি বিভক্তিব্যত্যয়ে মধ্যমে প্রথমপুরুষঃ। তিঙাং তিঙিতি স্মরণাৎ। আমিতি অব্যয়ানামনেকার্থত্বাৎ সর্ব্বতো ভাবেহপি দ্রষ্টব্যম্। এতজ্জপানন্তরম্ পিতৄনাবাহয়িষ্যে ইতি কাত্যায়নঃ। (৫) মন্ত্রো যথা। এত নান্দীমুখাঃ পিতরঃ সোম্যাসো গম্ভীরেভিঃ

পথিভিঃ পূর্ব্বৈর্গেভির্দ্দত্তাস্মভ্যং দ্রবিণেহ ভদ্রং রৈঞ্চ নঃ সর্ব্ববীরং নিযচ্ছত। অস্যার্থঃ। হে নান্দীমুখাঃ পিতরঃ পিতৃপিতামহ প্রপিতামহ মাতামহ প্রমাতামহ বৃদ্ধপ্রমাতামহ প্রভৃতয়ো হস্মিন্নাস্তৃতে বর্হিষি এত আগচ্ছত কিম্ভূতা যূয়ং সোম্যাসো সোমো দেবতা যেষাং ইতি সোম্যাসঃ সোমাস ইতি ট্যণ সোম্য পূর্ব্ববজ্জসেরসুগাগমঃ। কৈরাগমনমিত্যাকাংক্ষায়ামাহ। পথিভিরিতি কিম্ভূতৈঃ গম্ভীরেভিঃ গম্ভীরৈর্দেবাদীনাং প্রসিদ্ধবর্ত্মভিরিত্যর্থঃ। পুনঃ কিম্ভূতৈঃ। পূর্ব্বিণেভিঃ পূর্ব্বপুরুষাণাং কব্য-বাহনাদীনাং গমনাগমনপ্রসিদ্ধবর্ত্মভিরিত্যর্থঃ। আগত্য চ নো হস্মাকং ভদ্রং কল্যাণং দ্রবিণো ক্রমাগত ধনে চ দত্ত কুরুত হ ইতি সম্বোধনবাচকঃ। ন কেবলং লব্ধবিত্তে কিঞ্চ রৈঞ্চ লভ্যরূপং ধনঞ্চ তৎ সর্ব্বং নিযচ্ছত রৈমিতি ছান্দসত্বাৎ নিরুক্ত লক্ষণেন অমো হকারলোপঃ। কিম্ভূতং ধনং সর্ব্ববীরং সর্ব্ববীরমিতি ব্যত্যয়েন জসো হম্ সর্ব্বেষাং বীরাণাং শৌর্য্যাদিযুক্তানাং যৎ প্রার্থনীয়ং তদপি প্রযচ্ছত ইত্যাশংসাবাক্যার্থঃ। পূর্ব্বিণেভিরিতি পূর্ব্বশব্দাদ্বহুলং ঔণাদিক ইন প্রত্যয়ঃ

উশন্তস্ত্বা নিধীমহ্যুশন্তঃ সমিধীমহি। উশন্নুশত আবহ নান্দীমুখান্ পিতৄন্ হবিষে আত্তবে [৬] ইত্যাবাহ্য কৃতাঞ্জলিঃ। ওঁ আয়ান্তু নো নান্দীমুখাঃ পিতরঃ সোম্যাসো অগ্নিষ্বাত্তাঃ পথিভির্দেবযানৈঃ। অস্মিন্ যজ্ঞে পুষ্ট্যা মদন্তো হধিব্রুবন্তু তে হবন্ত্বস্মান্ [৭] ইতি জপ্ত্বা ওঁ অপহতাসুরারক্ষাংসি ২৫১

ছান্দসত্বাৎ অকারলোপে ন সন্ধিঃ। লক্ষণাত্বরোধায় বৃদ্ধিঃ ছান্দসাং ভিস ঐসাদেশবাধাদেবং গম্ভীরেভিরিতি বহুলং ছান্দসীতি ঐস্ ন ভবতি। (৬) উপন্তস্ত্বা ইত্যৃচাবাহয়েদিতি কাত্যায়নঃ। মন্ত্রো যথা উশন্তস্ত্বা নিধীমহ্যুশন্তঃ সমিধীমহি উশন্নুশত আবহ পিতৄন্ হবিষে অত্তবে। অস্যার্থঃ। অত্রাগ্নিরিত্যধ্যাহার্য্যম্। হে অগ্নে ত্বা ত্বাং নিধীমহি আদধীমহি আধানং তব কুর্ম্ম ইতি যাবৎ। বয়মিত্যধ্যাহার্য্যম্। কিম্ভূতা বয়ং ত্বামুশন্তঃ ইচ্ছন্তঃ কিঞ্চ ন কেবলং উশন্ত এব বয়ং ত্বাং সমিধীমহি প্রজ্বালয়ামঃ ত্বঞ্চ অস্মাভিরাহিতো জ্বলিতঃ সন্ পিতৄন্ অগ্নিষ্বাত্তাদীন্ আবাহয়। কিম্ভূতস্ত্বং উশন্ পিতৄন্ ইচ্ছন্। কিম্ভূতান্ পিতৄন্ উশত ইচ্ছতঃ। কিমর্থমাবাহন-মিত্যাহ অস্মদ্দত্তস্য হবিষে হত্তবে অদনার্থং। অত্তব ইতি অদেস্তোণাদিকস্তুন্ প্রত্যয়ঃ হবিষ ইতি ষষ্ঠ্যর্থে চতুর্থী বিভক্তিব্যত্যয়াৎ। হে অগ্নে আধানজ্বলনাভ্যাং আরাধি-তত্ত্বং পিতৄন্ অস্মাকং শ্রাদ্ধদেয়স্য হবিষে ভক্ষণার্থং আবহ আনয় ইত্যর্থঃ (৭) আবাহনানন্তরং অবধীর্য্য আয়ান্তু নো জপেদিতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ আয়ান্তু নঃ

॥ নান্দীমুখশ্রাদ্ধ ॥ * ॥

নান্দীমুখাঃ পিতরঃ সোম্যাসো অগ্নিস্বাত্তাঃ পথিভির্দেবযানৈরস্মিন্ যজ্ঞে পুষ্ট্যা মদন্তো হধিব্রুবন্তু তে হবন্তস্মান্। অস্যার্থঃ। নো হস্মাকং নান্দীমুখাঃ পিতর আয়ান্তু আগচ্ছন্তু কিম্ভূতাঃ সোম্যাসঃ সোম্যাঃ সোমপাখ্যাঃ সোমাড্যাণ লক্ষণাল্লুরোধান্ন হ্রদ্ধিঃ সোম্যাস ইতি বা পাঠঃ শাখান্তরীয়ঃ। ন কেবলং সোম্যা এব পিতরঃ অগ্নি-স্বাত্তাঃ শ্রৌতস্মার্ত্তাদিভিরগ্নিভিঃ স্বাত্তাঃ অনগ্নিদগ্ধানামত্রাধিকারো নাস্তীতি সংস্কৃতাঃ যে পিতর ইত্যর্থঃ। শ্রৌতস্মার্ত্তাদিভিঃ সংস্কারঃ কৃতঃ ইত্যর্থঃ। কৈরা-গচ্ছন্তু পথিভির্বর্ত্মভিঃ। কিম্ভূতৈর্দেবযানৈর্দেবানাং যানং গমনং যৈর্বর্ত্মভিস্তৈরাগত্য তে পিতরো হস্মিন্ শ্রাদ্ধরূপে যজ্ঞকর্ম্মণি অস্মান্ অধিব্রুবন্তু শ্লাঘয়ন্তু ইত্যর্থঃ। কিম্ভূতাস্তে মদন্ত স্তৃপ্যন্তঃ কয়া পুষ্ট্যা। ন কেবলং অধিব্রুবন্তু কিন্ত্ববন্তু রক্ষন্তু চ তে হস্মানিত্যাশংসাবাক্যার্থঃ। (৮) ততঃ পাত্রেষু জলং দদ্যাৎ শন্নো দেবীরিতি

বেদিষদ ইতি যবান্ বিকিরেৎ। ততো জলং স্পৃষ্ট্বা দৈবাদিক্রমেণ ব্রাহ্মণসম্মুখে উত্তরাগ্রদর্ভোপরি পিত্রে পূর্ব্বাগ্রকুশোপরি সপ্ত পত্রাণি সংস্থাপ্য ওঁ পবিত্রে স্থো বৈষ্ণব্যো ইত্যনেনানখচ্ছিন্নং ওঁ বিষ্ণোর্মনসা পূতে স্থ ইত্যনেন প্রোক্ষিতং পবিত্রং দৈবাদিক্রমেণ একৈকস্মিন্ পাত্রে একৈকং বিনস্য তেষু প্রত্যেকং ওঁ শন্নো দেবীরভিষ্টয়ে শন্নো ভবন্তু পীতয়ে শংযোরভিস্রবন্তু নঃ [ ৮ ] ইতি দৈবাদিক্রমেণ জলং দদ্যাৎ। ততো দৈবে ওঁ যবো হসি যবয়াস্মদ্দ্বেষো যবয়ারাতীর্দিবে ত্বা অন্তরীক্ষায় ত্বা পৃথিব্যৈ ত্বা শুন্ধন্তাং লোকাঃ পিতৃসদনঃ পিতৃসদনমসি ইতি যবান্ বিকীরেৎ। ততঃ পিত্রাদিপাত্রেষু ওঁ যবো হসি সোমদৈবত্যো ২১২

কাত্যায়নঃ। মন্ত্রো যথা। শন্নো দেবীরভিষ্টয়ে শন্নো ভবন্তু পীতয়ে শংযোরভিস্রবন্তু নঃ। অস্যার্থঃ। এতা অর্ঘ্যার্থমুপকল্পিতা আপো নো হস্মাকং শংভবন্তু কল্যাণ প্রদা ভবন্ত্বিত্যর্থঃ। কিম্ভূতা আপঃ দেবীর্দেব্যঃ দেবনাদিগুণযুক্তাঃ কিমর্থমভিষ্টয়ে উপচয়ার্থং পীতয়ে পানার্থং অভীষ্টয় ইত্যথে ছান্দসত্বাৎ হ্রস্বঃ কিঞ্চ নো হস্মাৎ শংযোঃ কল্যাণমংযোগায় অভিস্রবন্তু অভিমুখা ভবন্তু ইত্যাশংসাবাক্যার্থঃ। শংযোরিতি চতুর্থ্যর্থে ষষ্ঠী। দেবীরিতি সুপাংসুপ ইতি জসস্থানে শস বিভক্তি-ব্যত্যয়াৎ। (৯) ততো দৈবে যবান্ বিকিরেদিতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ যবোহসি যবয়াস্মদ্দ্বেষো যবয়াতীর্দিবে ত্বা অন্তরীক্ষায় ত্বা পৃথিব্যৈ ত্বা শুন্ধন্তাং লোকাঃ

পিতৃসদনাঃ পিতৃসদনমসি। অস্যার্থঃ। ত্বং যবো ঽসি যবো ভবসি যতস্তদস্মদ্দেষো ঽস্মদ্রূপজাতশত্রূন্ যবয় পৃথক্ কুরু সংহতিরহিতান্ কুরু ইত্যর্থঃ। ন কেবলং দ্বেষ এব কিন্তু অরাতীঃ সহজশত্রূন্ যবয় অসংহতান্ কুরু। বেদে অরাতিশব্দঃ স্ত্রীলিঙ্গোঽপি যতস্ত্বং পৃথক্ শরীরো অতোঽস্মাকং শত্রূন্ পৃথক্ কুরু। দ্বেষঃ কৃত্রিম শত্রুঃ। তথাচ দ্বেষঃ কৃত্রিমশত্রৌ স্যাদরাতিঃ সহজে স্ত্রিয়ামিত্যভিধানকাণ্ডম্। বৃহন্নাগমিনী যুমিশ্রণে যবয় ইতি পচাদ্যচি কৃতে তৎ করোতি তদাচষ্ট ইতীন্ দ্বেষ ইতি দ্বিষ ইত্যর্থে ছান্দস

গোময়ো দেবনির্ম্মিতঃ প্রত্নমদ্ভিঃ পৃক্তঃ পুষ্ট্যা নান্দীমুখান্ পিতৄন্ লোকান্ প্রীণাহি নঃ স্বাহা [৯]। ইতি প্রত্যেকং যবান্ দদ্যাৎ। ততো দৈবাদিক্রমেণ তূষ্ণীং গন্ধপুষ্পে দত্ত্বা কুশান্তরেণাচ্ছাদ্য ওঁ অচ্ছিদ্রমিদমর্ঘ্যপাত্রমস্তু ইতি ব্রূয়াৎ। ওঁ অস্ত্বিতি ব্রাহ্মণৈরুক্তে দেবব্রাহ্মণহস্তে পূর্ব্বাগ্রং পবিত্রং দত্ত্বা জলং জলান্তরং পুষ্পং পুষ্পান্তরঞ্চ দত্ত্বা পুষ্পান্তরেণ ওঁ শিরঃপ্রভৃতি ২২৩
সর্ব্বগাত্রেভ্যো নমঃ। ইতি সংপূজ্য পাত্রং বামহস্তেন কৃত্বা দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা আপঃ পয়সা সংবভূবুর্যা অন্তরীক্ষ্যা উত পার্থিবীর্য্যা হিরণ্যবর্ণা যজ্ঞিয়াস্তা ন আপঃ শিবাঃ সংশ্যোনাঃ সুহবা ভবন্তু (১০) ইতি পঠিত্বা ওঁ বসুসত্যৌ বিশ্বে

একারং। ত্বা ত্বাং অন্তরীক্ষায় নভোগতায় দিবে স্বর্গগমনায় পৃথিব্যৈ পৃথিবীলাভায় রাজ্যপ্রাপ্তয়ে ত্বামুপাস্মহে ইত্যর্থঃ। কিন্তু হে যব। ত্বয়া শত্রুক্ষয়াদিরূপেণ উপকৃতা লোকাঃ কব্যপাদিরূপাঃ শুন্ধন্তাং শুদ্ধিভাবা ভবন্তু। কিন্তু তাঃ পিতৄণাং সদনং ভবনমাপন্নাঃ পিতৃলোকমাপন্নাঃ ইত্যর্থঃ। কিন্তু হে যব ত্বমপি পিতৃসদনমসি পিতৄণাং ভবনং ভবসীতি যতঃ অতঃ শত্রূন্ যবয়েত্যর্থঃ। (১০) একৈকস্য একৈকেন সদাভীতি কাত্যায়নঃ। ওঁ যা দিব্যা আপঃ পয়সা সংবভূবুর্যা অন্তরীক্ষা উত পার্থিবীর্যা হিরণ্যবর্ণা

যজ্ঞিয়াস্তা ন আপঃ শিবাঃ সংশ্যোনাঃ স্যোনাঃ স্বহবা ভবন্তু। অস্যার্থঃ। আপঃ পানীয়ানি পয়সা ক্ষীরেণ সংবভূবুঃ সঙ্গতাঃ মাধুর্য্যশৈত্যাদিনা একীভাবমাপন্নাঃ কাস্তা আপঃ যা দিব্যাঃ দিবি স্বর্গে ভূতাঃ যা অন্তরীক্ষ্যাঃ আকাশভবাঃ উত অপার্থে যাঃ পার্থিবীঃ পৃথিবীসম্বন্ধাঃ পুনঃ কীদৃশ্যঃ হিরণ্যবর্ণাঃ রজতবদ্বিশুদ্ধাঃ হিরণ্যং রজতেঽপি দৃশ্যতে॥ তথাচ। হিরণ্যং রজতেঽপি স্যাৎ সুবর্ণে চ কপর্দ্দকে। পুনঃ কীদৃশ্যঃ যজ্ঞিয়াঃ যজ্ঞার্হাঃ তদর্হতীতি ঈয়প্রত্যয়ঃ ছন্দসি বহুলমিতি হ্রস্বঃ। তদেবম্ভূতা আপো নো-

দেবা এতদ্বোঽর্ঘ্যং নমঃ। ইতি উৎসৃজ্য ব্রাহ্মণহস্তে ঽর্ঘ্যং দদ্যাৎ। ততঃ পিতৃপক্ষে ওঁ অচ্ছিদ্রাণ্যেতান্যর্ঘ্যপাত্রাণি সন্তু ইতি ব্রূয়াৎ। ওঁ সন্ত্বিতি প্রতিবচনং। ততঃ পিতৃব্রাহ্মণহস্তে উত্তরাগ্রং পবিত্রং দত্ত্বা জলং জলান্তরং পুষ্পং পুষ্পান্তরঞ্চ দত্ত্বা পুষ্পান্তরেণ ওঁ শিরঃ প্রভৃতি সর্ব্বগাত্রেভ্যো নমঃ। ইতি সংপূজ্য পাত্রং বামহস্তে ধৃত্বা দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা ইতি পঠিত্বা ঋজুকুশত্রয়জলান্যাদায় ওঁ অমুক গোত্র নান্দীমুখ পিতরমুক দেবশর্ম্মন্নেতত্তেঽর্ঘ্যং ওঁ যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে নমঃ। ইতি ব্রাহ্মণেঽর্ঘ্যং দত্ত্বা পাত্রস্থ শেষজলাদিরূপসংস্রবসহিতং পাত্রং তত্রৈব স্থাপয়েৎ। ততো জলং স্পৃষ্ট্বা পঞ্চপাত্রসংস্রবং গৃহীত্বা প্রপিতামহপাত্রে ঽচ্ছাদ্য স্ববামে সমূলদর্ভোপরি সংস্রবসহিতং পাত্রং অধোমুখং ওঁ নান্দীমুখেভ্যঃ পিতৃভ্যঃ স্থানমসীত্যনেন ন্যুব্জং কুর্য্যাৎ [ ১১ ]। ততো জলং স্পৃষ্ট্বা দৈবে ওঁ বসুসত্যৌ বিশ্বদেবা এতানি বো গন্ধপুষ্পধূপ ২২৪

ঽস্মাকং শিবা ভবন্তু কল্যাণপ্রদা ভবন্ত্বিত্যর্থঃ। ন কেবলং কল্যাণপ্রদা এব কিন্তু সংশ্যোনাঃ সুখদা অপি ভবন্তু। ন কেবলং সংশ্যোনা এব স্বহবা অপি তু সন্তু ব্রাহ্মণহস্তে দত্তাঃ সুখেনাহুতা ভবন্তু ইত্যর্থঃ। শৈত্যাদিগুণেনাভিব্যঞ্জনেন ব্রাহ্মণস্য সুখসম্পাদকা ভবন্তু ইত্যর্থঃ। শ্যোনা ইতি সুখস্য নাম নিরুক্তে চ দৃশ্যতে। শ্যোনঃ স্যাৎ সুখ তৃপ্তয়োরিতি। পার্থিবীরিতি বিভক্তিব্যত্যয়ে প্রথমায়াং দ্বিতীয়েতি। (১১) প্রথমপাত্রে সংস্রবান্ সমবনীয় পাত্রং ন্যুব্জং করোতীতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ পিতৃভ্যঃ

স্থানমসি। হে পাত্র নোঽস্মাকং পিতৃভ্যঃ পিতৃপিতামহ প্রপিতামহাদীনাং স্থানং আধারো ঽসি। পিতৃভ্য ইতি ষষ্ঠ্যর্থে চতুর্থী। অতঃ পিতৃভ্য ইতি পিতৃপিতামহ-প্রপিতামহাদীনামিতি যোজনীয়ম্। যতস্ত্বং পিতৄণাং স্থানং অতস্তেষাং অবস্থানং স্বীকৃতো ঽসি ইতি ভাবঃ। ইদন্তু পিতৄণামাবরণম্। আবৃতাস্তত্র তিষ্ঠন্তি পিতরঃ



দীপাচ্ছাদনানি নমঃ। ইত্যুৎসৃজ্য এষ বো গন্ধঃ এতদ্বঃ পুষ্পং এষ বো ধূপঃ এষ বো দীপঃ এতদ্ব আচ্ছাদনমিতি প্রত্যেকং নিবেদয়েৎ। ততঃ পিতৃপক্ষে প্রদক্ষিণক্রমেণ ওঁ অমুক গোত্র নান্দীমুখ পিতরমুক দেবশর্ম্মন্নমুক গোত্র নান্দীমুখ পিতামহামুক দেব-শর্ম্মন্নমুক গোত্র নান্দীমুখ প্রপিতামহামুক দেবশর্ম্মন্নেতানি তে গন্ধপুষ্পধূপদীপাচ্ছাদনানি ওঁ যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে নমঃ। ইত্যুৎসৃজ্য এষ তে গন্ধঃ এতত্তে পুষ্পং এষ তে ধূপঃ এষ তে দীপঃ এতত্তে আচ্ছাদনমিতি প্রত্যেকং নিবেদয়েৎ। এবং মাতামহপক্ষেঽপি। ততঃ ওঁ গন্ধাদিদানমিদমচ্ছিদ্রমস্তু ইত্যবধার্য্য তূষ্ণীং দৈবাদিক্রমেণ ব্রাহ্মণাগ্রস্থিতং কুশাদিকং সমস্ত-মেবাপনীয় দৈবে পিত্রে ঽপি ঐশানীমারভ্য দক্ষিণাবর্ত্তেন প্রাগগ্রজলরেখয়া চতুষ্কোণ মণ্ডলং কৃত্বা ভোজনপাত্রাণি দৈবাদিক্রমেণ স্থাপয়েৎ। ততঃ সঘৃতমন্নমাদায় ওঁ অগ্নৌ করিষ্যামীতি ব্রাহ্মণং পৃচ্ছেৎ ওঁ কুরুষেত্যুক্তে জলে ওঁ স্বাহেত্যুক্ত্বা আহুতিং দদ্যাৎ। ততঃ ওঁ সোমায় পিতৃমতে ইতি মন্ত্রশেষমুদীরয়েৎ। ততঃ ওঁ স্বাহা ইত্যপরাহুতিং দত্ত্বা ওঁ অগ্নয়ে কব্যবাহনায় ইতি মন্ত্রশেষং সমা-পয়েৎ। (১২) এবং দ্বির্হুত্বা ততস্তূষ্ণীং বারদ্বয়ং হুত্বা হুতশেষং দৈবপাত্রে বারদ্বয়ং পিতৃপাত্রে বারত্রয়ং মাতামহপাত্রে বারত্রয়ঞ্চ ২৯৫

শৌনকো ঽব্রবীদিতি স্মৃতিঃ। (১২) তত উদ্ধৃত্য ঘৃতাক্তমন্নং পৃচ্ছত্যগ্নৌ করিষ্যামি ইতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ স্বাহা অগ্নয়ে কব্যবাহনায়। ওঁ স্বাহা সোমায়

পিতৃমতে। অস্যার্থঃ। স্বাহা ইত্যাহুতিং দত্ত্বা সোমায় পিতৃমতে ইতি মন্ত্রশেষমুদীরয়েৎ সোমমণ্ডলাকারত্বাৎ। অগ্নয়ে কিম্ভূতায় কব্যবাহনায় কব্যং পিতৃণামন্নং ভদ্বহতীতি কব্যবাহনঃ তস্মৈ। ততো হুতশেষং দত্ত্বা (১৩) পাত্রমালভ্য জপেদিতি কাত্যায়নঃ। ওঁ পৃথিবী তে পাত্রং দ্যৌঃ পিধানং ব্রাহ্মণস্য মুখে অমৃতে অমৃতং জুহোমি স্বাহা। অস্যার্থঃ। হে অগ্নৌকরণহোমশেষ তে তব পাত্রমাধারঃ পৃথিবী বিশ্বাধারভূতা দ্যৌরাকাশং পিধানং আবরণমাচ্ছাদনং ত্বামমৃতং হুতশেষং

দত্ত্বা পিণ্ডার্থং কিঞ্চিৎ স্থাপয়েৎ। অত্র দ্রাক্ষাদধিবদরামলকাম্রাদীনাং প্রাশস্ত্যং অন্নেষু প্রচুরঘৃতঞ্চ দদ্যাৎ। ততো দৈবে-অনুত্তানহস্তাভ্যাং পাত্রং ধৃত্বা ওঁ পৃথিবী তে পাত্রং দ্যৌঃ পিধানঃ ব্রাহ্মণস্য মুখে অমৃতে অমৃতং জুহোমি স্বাহা (১৩) ইতি পঠেৎ। পিত্র্যে অপ্যুত্তানহস্তাভ্যাং পাত্রং ধৃত্বা ওঁ পৃথিবী তে পাত্রমিতি পঠেৎ। এবং মাতামহপক্ষেঽপি। ততো দৈবাদিক্রমেণ জলাদিকং যথাসম্ভবং দ্রাক্ষামলকমূলাদিপিণ্ডপ্রাপ্তত্বেন দধিমধুবদরাণি যবাংশ্চ সর্ব্বমন্নাদিকং পাত্রান্তরিতহস্তাভ্যাং ভূমৌ সংস্থাপ্য পত্নী স্বয়ং বা পরিবেশয়েৎ। সীসকায়সপাষাণাষ্টাঙ্গুলন্যূনভগ্নমৃণ্ময়পাত্রাণি বর্জ্জয়েৎ ভগ্নমপি তাম্রাদি পাত্রং গ্রাহ্যং রজতপাত্রং স্বল্পমপি গ্রাহ্যম্। ততঃ সর্ব্বত্র সজলং কৃত্বা দৈবে অন্নং সংপ্রোক্ষ্য ওঁ বিষ্ণো হব্যমিদং রক্ষস্ব। পিত্র্যে বিষ্ণো কব্যমিদং রক্ষস্ব ইতি পঠিত্বা। ওঁ ইদং বিষ্ণুর্ব্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে (১৪) ইতি পঠিত্বান্নাদাবনধমঙ্গুষ্ঠং

ব্রাহ্মণমুখে জুহোমি কিম্ভূতে মুখে অমৃতে অনষ্টে অভক্ষ্যভক্ষণাদিভিরপ্যদূষিতে। অত্র তে ইতি যুষ্মচ্ছব্দপ্রয়োগাদগ্নৌ করণবিশেষণং প্রাপ্যতে প্রকৃতত্বাৎ জুহোমি হোমপ্রদর্শনাৎ। স্বাহাপদোপাদানাৎ অব্যাহতম্। ব্রাহ্মণস্যাগ্নিতুল্যত্বেন তৎপাণৌ হোমঃ প্রযুক্তঃ দেবতাশ্চাত্র পিতরস্তথা চাপস্তম্বঃ। পিতরো হত্র দেবতা ব্রাহ্মণশ্চাহবনীয়ার্থে ইত্যাদিনা ব্রাহ্মণস্যাগ্নিতুল্যত্বং পিতৃণাং দেবতাতুল্যত্বং প্রতিপাদিতবান্ (১৪) বৈষ্ণব্যার্চ্চা যত্রাঙ্গুষ্ঠমন্নে অবগাহ্যেতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ

ইদং বিষ্ণুর্বিচক্রমে ত্রেধা নিদধে পদং সমূঢমস্য পাংশুলে। অস্যার্থঃ। বিষ্ণুর্ভগবান্ বিশ্বব্যাপিতয়া ইদমন্নং বিচক্রমে আক্রান্তবান্। কিঞ্চ বিষ্ণুরেব পদমস্মিন্নন্নে নিদধে নিহিতবান্। কেন প্রকারেণ ত্রেধা ত্রিঃ প্রকারম্। কুত্র কুত্র পৃথিব্যাং আকাশে স্বর্গে চ অস্য বিষ্ণোঃ পদং যতো গতং অতঃ পাংশুলে পাংশুযুক্তে ভূদেশে সমূলং সম্যক্ নিবিষ্টং তদয়ং বাক্যার্থঃ। বিষ্ণুর্ভগবান্ ত্রিবিক্রমরূপেণ ঊর্দ্ধমধ্যাধো ব্যাপ্তস্তস্য পদং বিশেষতঃ পৃথিব্যাং নিবিষ্টং স বিষ্ণুরিদমন্নমাক্রান্তবান্ অতো

॥ ● ॥ নান্দীশ্রাদ্ধং ॥ ● ॥ (৪৫)

নিবেশয়েৎ। ততো দৈবে তূষ্ণীং যবান্ নিঃক্ষিপ্য পিত্র্যে ওঁ অপহতাসুরা রক্ষাংসি বেদিষদ ইতি যবান্ বিকীরেৎ (১৫)। ততো মন্ত্রং বিনা অন্নে মধু দত্ত্বা তদভাবে গুড়ং দত্ত্বা ব্রাহ্মণায় জলগণ্ডূষং দত্ত্বা সপ্রণবব্যাহৃতিকাং গায়ত্রীং ওঁ মধু মধু মধ্বিতি চ জপেৎ। তত উত্তরাভিমুখো বামহস্তেনান্নপাত্রং ধৃত্বা ঋজুকুশত্রয়েণ ওঁ বসুসত্যৌ বিশ্বে দেবা এতদ্বো ঽন্নং সোপকরণমুদকং নমঃ (সগঙ্গো-দকোপকরণং নমঃ)। ইত্যুৎসৃজ্য তত্র ইদমন্নং ইমা আপঃ ইদং হবিঃ এতানি উপকরণানি যথাসুখং বাগ্যতাঃ স্বদতঃ ইতি বদেৎ। ততঃ পূর্ব্বাভিমুখঃ পিতৃপক্ষে ঋজুকুশত্রয়েণ ওঁ অমুক গোত্র নান্দীমুখ পিতরমুক দেবশর্ম্মন্নমুক গোত্র নান্দীমুখ পিতামহামুক দেবশর্ম্ম-ন্নমুক গোত্র নান্দীমুখ প্রপিতামহামুক দেবশর্ম্মন্নেতত্তে ঽন্নং সোপকরণোদকং ওঁ যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে নম ইত্যুৎসৃজ্য ইদমন্নং ইমা আপ ইদং হবিঃ এতান্যুপকরণানি যথাসুখং বাগ্যতাঃ স্বদত ইতি বদেৎ। এবং মাতামহপক্ষেঽপি। ততঃ প্রত্যেকং জলগণ্ডূষং দদ্যাৎ। ততো ভুঞ্জানেষু ব্রাহ্মণেষু সপ্রণবব্যাহৃতিকাং গায়ত্রীং ত্রিঃ সকৃদ্বা মধুবাতেত্যৃচং মধু মধু মধ্বিতি

২১৭

রাক্ষসাদয়োঽত্রাপসরন্ত্বিত্যর্থঃ। (১৫) ততঃ যবান্ বিকীর্য্য অসুরান্নিরস্যতীতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ অপহতাসুরা রক্ষাংসি বিদিষদঃ। অস্যার্থঃ। অস্মিন্ শ্রাদ্ধার্থমুপকল্পিতে অন্নে হে অসুরা অপহত অপগচ্ছত দূরীভবত ইত্যর্থঃ। কিন্তু তাস্তে বিদিষদঃ। বেদ্যাং সীদন্তি তিষ্ঠন্তীতি শ্রাদ্ধার্থপরিষ্কৃতায়াং ভূমৌ যে

তথা নো ঽস্মাকং পিতা মধুমানস্তু ভবতু। তথা নো ঽস্মাকং বনস্পতিরুদ্যানতরবো মধুফলা ভবন্তু। তথা সূর্য্যো জগদেকসাক্ষী মধুময়ো ভবতু। পূর্ব্ববদর্থসঙ্গতত্বাৎ অন্তে-রাদিলোপঃ। তথা নো ঽস্মাকং গাবো মাধ্বীঃ মধুক্ষীরিণ্যো ভবন্তু ইত্যাশংসাবাক্যার্থঃ। ঋতায়ত ইতি ঋতশব্দাদায়প্রত্যয়ে তিঙাং তিঙিতি বহুবচনে একবচনং মাধ্বীরিতি বিভক্তিব্যত্যয়ে প্রথমায়াং দ্বিতীয়া এবমোষধীরিত্যত্রাপি। উষসশ্ছান্দসত্বান্ন নুনাগমঃ। (১৭) ততঃ তৃপ্তিং জ্ঞাত্বান্নং বিকীরেৎ ইতি কাত্যায়নঃ। মন্ত্রস্তু পৌরাণিক এব। ওঁ অগ্নিদগ্ধাশ্চ যে জীবা যে ঽপ্যদগ্ধাঃ কুলে মম। ভূমৌ দত্তেন তৃপ্যন্তু তৃপ্তা যান্তু পরাং গতিং। ওঁ যেষাং ন মাতা ন পিতা ন বন্ধুর্নৈবান্নসিদ্ধির্ন তথান্নমস্তি

সংপ্রোক্ষ্য সর্ব্বপ্রকারমন্নমুদ্ধৃত্য সযবমেকীকৃত্য বারিণাপ্লুত্য ওঁ অগ্নিদগ্ধাশ্চ যে জীবা যে ঽপ্যদগ্ধাঃ কুলে মম। ভূমৌ দত্তেন তৃপ্যন্তু তৃপ্তা যান্তু পরাং গতিম্। ওঁ যেষাং ন মাতা ন পিতা ন বন্ধুর্নৈবান্নসিদ্ধির্ন তথান্নমস্তি তত্তৃপ্তয়ে ঽন্নং ভুবি দত্তমেতৎ প্রয়ান্তু লোকায় সুখায় তদ্বৎ (১৬)। ইতি মন্ত্রাভ্যাং তদুক্তফলমুদ্দিশ্য কুশোপরি বিকীরেৎ। ততো হস্তৌ প্রক্ষাল্যাচম্য আচমনা-শক্তৌ দক্ষিণশ্রবণং স্পৃষ্ট্বা হরিং স্মৃত্বা দৈবাদিক্রমেণ ব্রাহ্মণেভ্যঃ প্রত্যেকং জলগণ্ডূষং দত্ত্বা পূর্ব্ববদ্গায়ত্রীং মধুবাতেত্যৃচং মধু মধু মধ্বিতি জপ্ত্বা ওঁ শেষমন্নং ক্ব দেয়মিতি পৃচ্ছেৎ। ওঁ ইষ্টেভ্যো দীয়তামিতি প্রতিবচনম্। ততঃ ওঁ পিণ্ডদানমহং করিষ্যে ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেতি তৈরুক্তে পূর্ব্বাভিমুখঃ। ওঁ নিহন্মি সর্ব্বং যদমেধ্যবদ্ভবেদ্ধতাশ্চ সর্ব্বে ঽসুরদানবা ময়া। রক্ষাংসি যক্ষাঃ সপিশাচসংঘা হতা ময়া যাতুধানাশ্চ সর্ব্বে (১৮) ইত্যনেন ঐশানীমারভ্য দক্ষিণাবর্ত্তেন প্রাগগ্রং মণ্ডলং কৃত্বা

তত্তৃপ্তয়ে ঽন্নং ভুবি দত্তমেতৎ প্রয়ান্তু লোকায় সুখায় তদ্বৎ। অস্যার্থঃ। মম কুলে বংশে যে জীবাঃ প্রাণিনো ঽগ্নিদগ্ধা লৌকিকাগ্নিনা যেন কেনাপি দগ্ধা এব পিণ্ডোদকভাজো ন ভূতাস্তথাপি যে দুর্ভিক্ষমরণে দগ্ধা দাহমেব ন লভন্তে তে জীবা মামকা মদ্দত্তেন বিকীরণান্নেন তৃপ্যন্তু তৃপ্তাঃ সন্তঃ পরাং গতিং উৎকৃষ্ট স্থানং প্রয়ান্তু গচ্ছন্তু। তথা যেষাং জীবানাং মাতৃপিতৃপ্রভৃতয়ো বান্ধবা ন বিদ্যন্তে শ্রাদ্ধদায়িনস্তেষামপি তৃপ্তয়ে ভুবি ভূমৌ অন্নং দত্তং ময়েতি শেষঃ। তেনান্নেন তৃপ্তাঃ

॥ ● ॥ শ্রাদ্ধপদ্ধতিঃ ॥ ● ॥

মন্তঃ স্বধায় লোকায় স্বর্গ্যায় প্রয়ান্তু গচ্ছন্তু। গত্যর্থকর্ম্মণীতি কর্ম্মণি চতুর্থী। (১৮) বিকীরণানন্তরং ভূমৌ রেখাং কুর্য্যাৎ। ইতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ নিহন্মি-
সর্ব্বং যদমেধ্যবদ্ভবেদ্ধতাশ্চ সর্ব্বে হসুরদানবা ময়া। রক্ষাংসি যক্ষাঃ সপিশাচসঙ্ঘা হতা ময়া যাতুধানাশ্চ সর্ব্বে। অস্যার্থঃ। অস্মিন্ প্রকৃতে কর্ম্মণি যদমেধ্যবৎ

তদ্দক্ষিণে তথাবিধমপরমণ্ডলং কৃত্বা তত্র প্রাদেশমাত্রং সাগ্রকুশপত্রদ্বয়ং গৃহীত্বা বামহস্তান্বারব্ধদক্ষিণহস্তেন মণ্ডলমধ্যস্থানে পূর্ব্বাগ্র-
রেখাদ্বয়ং ওঁ অপহতা নিহন্মীতিমন্ত্রাভ্যাং কুর্য্যাৎ। ততস্তৎ কুশপত্রদ্বয়মুত্তরস্যান্দিশি ক্ষিপেৎ। ততো রেখোপরি সমূলান্
সাগ্রান্ কুশানাস্তীর্য্য ওঁ দেবতাভ্যঃ পিতৃভ্যশ্চ মহাযোগিভ্য এব চ। নমঃ পুষ্ট্যৈ স্বাহায়ৈ নিত্যমেব ভবন্ত্বিতি। ইতি ত্রিঃ
পঠেৎ। তত এত নান্দীমুখাঃ পিতরঃ সোম্যাসো গম্ভীরেভিঃ পথিভিঃ পূর্ব্বিণেভির্দত্তাস্মভ্যং দ্রবিণেহ ভদ্রং রৈঞ্চ নঃ সর্ব্ববীরং ৩০
নিযচ্ছত ইত্যাবাহ্য যবাংশ্চাস্তীর্ণকুশেষু বিকীরেৎ। ততঃ সযবপুষ্পজলপাত্রং গৃহীত্বা বামহস্তাদ্দক্ষিণহস্তেন সংগৃহ্য ওঁ অমুক
গোত্র নান্দীমুখ পিতরমুক দেবশর্ম্মন্নবনেনিক্ষ্ব ওঁ যে চাত্র ত্বামনুযাংশ্চ ত্বমনু তস্মৈ তে নমঃ (১৯)। ইত্যেবং জলস্পর্শপূর্ব্বকং

যদপবিত্রভূতং অবিহিতাচরণাচারাদিরূপেণ যদসাঙ্গরূপং তন্নিহন্মি নিরস্যামি তথা যদত্রাসুরদানবাদয়ো বিঘ্নকারিণস্তেঽপি হতা নিরস্তাঃ সর্ব্ব এব অতস্তেষামত্রানবসর
ইত্যভিপ্রায়ঃ। (১৯) রেখোপরি কুশানাস্তীর্য্যাবনেজয়েদিতি কাত্যায়নঃ। মন্ত্রস্তু ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নবনেনিক্ষ্ব যে চাত্র ত্বামনুযাংশ্চ তমনু তস্মৈ

তে স্বধেতি গোভিলোক্তঃ। অস্যার্থঃ। হে পিতস্ত্বমবনেনিক্ষ্ব মদ্দত্তেন তোয়েন শুদ্ধো ভব। ন কেবলং ত্বমেব কিন্ত্বন্যেঽপি যে ঽত্র শ্রাদ্ধকর্ম্মণি ত্বামনু তব পশ্চাদ্ভোক্তারস্তথা যাংশ্চ ত্বমনু যেষাং ত্বং পশ্চাদ্ভোক্তাসি। তস্মৈ তবানুযায়িনে তুভ্যং স্বধা। তস্মৈ ইতি বহুবচনে একবচনং তেভ্য ইত্যর্থঃ। (২০) অবনেজনে পিণ্ডান্নিনয়েদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ অক্ষন্নমীমদন্ত হ্যবপ্রিয়া অধূষত অস্তোষত স্বভানবো বিপ্রান্ বিষ্ঠয়া মতীয়ো যান্বিন্দ্রতে হরী। অস্যার্থঃ। হে হরে হে ইন্দ্র

পিতামহাদি পঞ্চেভ্যো মূলমধ্যাগ্রক্রমেণাস্তীর্ণ কুশেষু দদ্যাৎ। ততো হগ্নৌকরণশেষেণ সর্ব্বাবশিষ্টান্নেন বিল্বপ্রমাণান্ ষট্ পিণ্ডান্ নির্ম্মায় বামহস্তগৃহীতজলপাত্রাদ্দক্ষিণহস্তেন পিণ্ডমেকং গৃহীত্বা ওঁ মধুবাতা ঋতায়তে মধু ক্ষরন্তু সিন্ধবঃ মাধ্বীর্নঃ সন্ত্বোষধীঃ ওঁ মধু নক্তমুতোষসো মধুমৎ পার্থিবং রজঃ। মধু দ্যৌরস্তু নঃ পিতা ওঁ মধুমান্নো বনস্পতির্মধুমাংঽস্তু সূর্য্যো মাধ্বীর্গাবো ভবন্তু নঃ। ওঁ মধু মধু মধু। ওঁ অক্ষন্নমীমদন্ত হ্যব প্রিয়া অধূষত অস্তোষত স্বভানবো বিপ্রান্ বিষ্ঠয়া মতীয়ো যান্বিন্দ্রতে হরীতি [২০]। পঠিত্বা প্রথমাস্তীর্ণ কুশমূলে অবনেজনস্থানে ওঁ অমুক গোত্র নান্দীমুখ পিতরমুক দেবশর্ম্মন্নেষ তে পিণ্ডঃ ওঁ যে চাত্র 



যান্ বিপ্রান্ যে শ্রাদ্ধভোক্তারো বিপ্রা মদ্দত্তেনান্নপানীয়েনামীমদন্তঃ মুদমত্যর্থং প্রাপ্য হর্ষযুক্তা বভূবুস্তথা অস্তোষত যে তুষ্টা ভূতাস্তথা অক্ষন্ যে সংহতা একীভূতাস্তাং বিপ্রান্ অব পালয়। হি যস্মাৎ তে তব প্রিয়া বল্লভাঃ ব্রাহ্মণো মামকী তনুরিতি ত্বয়ৈবোক্তত্বাৎ তত্র তে বিপ্রাস্তবৈব আশ্রয়ান্নাধূষত নাবকম্পন্ত কিন্তু তাস্তে বিপ্রাঃ স্বভানবঃ স্বপ্রকাশশীলাঃ স্বপ্রদীপকা ইতি যাবৎ। উ অবধারণে নু বিতর্কে। বিপ্রাঃ পুনঃ কীদৃশা বিষ্ঠয়ামতীয়া ঊর্দ্ধাগামিন্যা মত্যা বিশিষ্টা বিষ্ঠেতি বি শব্দো হস্বরাক্ষে

হপি বৌ তিষ্ঠতি গচ্ছতি বা বিষ্ঠা ছান্দসত্বাৎ যত্বম। অতস্তর্কয়ামি সুপ্রকাশবত ইতি ছান্দসত্বাৎ। মতা ইত্যর্থে মতীয়া যকারাগমঃ ছান্দসত্বাৎ। হরীতি সম্বোধনপদং সম্-
হ্বাবী দিতি ঈকারঃ। ইন্দ্র ইতি হরিবিশেষণং পরমেশ্বরত্বাৎ অবিদ্যাং কাব্যে হরতীতি হরিরিতি অন্বয়াৎ। যানিতি বিভক্তিব্যত্যয়েন প্রথমায়াং দ্বিতীয়া পূর্ব্ববৎ তেনায়-

ত্বামনুযাংশ্চ ত্বমনু তস্মৈ তে নমঃ। ইতি পঠিত্বা বামহস্তান্বারব্ধদক্ষিণহস্তেন দদ্যাৎ। ততঃ প্রত্যেকং জলস্পর্শপূর্ব্বকং পিতামহাদি পঞ্চভ্যা পঞ্চ পিণ্ডানবনেজনস্থানে দদ্যাৎ। ততঃ পিণ্ডান্তিকে পিণ্ডশেষং বিকীরেৎ। হস্তলেপঞ্চ প্রথমাস্তীর্ণ-কুশমূলেষু। ওঁ লেপভুজো নান্দীমুখঃ পিতরঃ প্রীয়ন্তামিতানেন নিম্বষ্যাচম্য হরিং স্মৃত্বা পিণ্ডপাত্রং প্রক্ষাল্য তজ্জলসহিতং পাত্রং বামহস্তাদ্দক্ষিণহস্তেন গৃহীত্বা প্রক্ষালনজলেন ওঁ অমুক গোত্র নান্দীমুখ পিতরমুক দেবশর্ম্মন্নেতত্তে হবনেনিক্ষ্ব ওঁ যে চাত্র ত্বামনুযাংশ্চ ত্বমনু তস্মৈ তে নমঃ ইত্যবনেজয়েৎ। জলস্পর্শপূর্ব্বকং এবং পিতামহাদি পঞ্চসু। তত ওঁ অত্র নান্দীমুখাঃ পিতরো মাদয়ধ্বং যথাভাগমাবৃষায়ধ্বং ইতি জপেৎ। তত আচম্য বামাবর্ত্তেন উদঙ্মুখো ভূত্বা শ্বাসং ধৃত্বা তেনৈব পথা পরাবর্ত্তমানঃ সর্ব্বান্ পিতৃন্ ভাস্বরমূর্ত্তিকান্ তুষ্টান্ ধ্যায়ন্। ওঁ অমীমদন্তঃ নান্দীমুখাঃ পিতরো যথাভাগমাবৃষায়ধ্বং ইতি জপেৎ [২১]।



মথঃ। যে বিপ্রা অত্র কর্ম্মণি ভোক্তারস্তান্ বিপ্রান্ অব ইত্যর্থঃ। অক্ষন্নিতি ছান্দসত্বাদড়াগমবাধঃ। মতীয়া উ যান্ ইত্যর্থে মতীয়ো যাম্নিন্দ্র ইতি ব্যুৎপত্তিঃ। যত্ত-
দোরতি সম্বন্ধনিয়মাৎ যচ্ছব্দপ্রয়োগে তানিত্যধ্যাহার্য্যম্। (২১) পিণ্ডদানানন্তরং অত্র পিতর ইতি জপেদিতি কাত্যায়নঃ। মন্ত্রস্তু। অত্র 'পিতরো মাদয়ধ্বং

যথাভাগমাবৃষায়ধ্বম্। অস্যার্থঃ। হে পিতরঃ অত্র পিণ্ডে মাদয়ধ্বং হর্ষযুক্তা ভবত। ন কেবলং মাদয়ধ্বং কিন্তু যথাভাগং স্বং স্বং ভাগং শ্রাদ্ধোপযুক্তং প্রাপ্য আবৃষায়ধ্বং বৃষা ইব বলিনো ভব। অত্রৈবামীমদন্তঃ পিতরো যথাভাগমাবৃষায়িষত। পিতরোঽমীমদন্ত মোদং প্রাপ্তা মদ্দত্তেন পিণ্ডেন হর্ষযুক্তা ভূতা ইত্যযথেতি ব্যাখ্যাতম্। ইব বলিনো বৃষশব্দাৎ ক্যঙ্ লোট্। বসন্তায় নমস্ত পিণ্ডপূজানন্তরমিতি স্মার্ত্তাঃ। (২২) ততঃ পরাবৃত্য নমো ব ইতি জপেদিতি কাত্যায়নঃ।

অনয়োর্মন্ত্রয়োর্মধ্যে যদ্বসন্তায়েতি পঠিতং তৎপ্রমাণশূন্যং কিন্তু প্রমাণান্তরমেব পাঠঃ। তথাচ ব্রহ্মপুরাণম্। সংপূজয়িত্বা পিণ্ডান্ পিণ্ডংশ্চ প্রণমেদৃতূন্। ততঃ শ্বাসং ত্যজেৎ। ততঃ কৃতাঞ্জলিঃ। ওঁ নমো বো নান্দীমুখাঃ পিতরোঃ নমো বঃ ইতি জপেৎ। ওঁ গৃহান্নো নান্দীমুখাঃ পিতরো দত্ত। ইতি গৃহিণীং পশ্যেৎ। ওঁ সদো বো নান্দীমুখাঃ পিতরো দেশ্ম [২২]। ইতি পিণ্ডান্ পশ্যেৎ। ততো নবমনবম্রা শুক্লবস্ত্রাদশাভবং সূত্রং বামহস্তাদ্দক্ষিণহস্তেন গৃহীত্বা ওঁ এতদ্বো নান্দীমুখাঃ পিতরো বাস ইতি পঠিত্বা। ওঁ অমুক গোত্র নান্দীমুখ পিতরমুক দেবশর্ম্মন্নেতত্তে বাস ওঁ যে চাত্র ত্বামনুযাংশ্চ ত্বমনু তস্মৈ তে নমঃ। ইতি। ইতি বামহস্তান্বারব্ধদক্ষিণহস্তেন পিতৃপিণ্ডে দদ্যাৎ। ততঃ প্রত্যেকং জমস্পর্শপূর্ব্বকং পিতামহাদি পঞ্চপিণ্ডেষু এবমেব সূত্রতন্তূন্ প্রত্যেকং মন্ত্রপূর্ব্বকং দদ্যাৎ। ততস্তষ্টান্ পিতৄনুদ্দিশ্য গন্ধাদিনা পিণ্ডান্ পূজয়েৎ। ততঃ কৃতাঞ্জলিঃ। ওঁ বসন্তায় নমস্তুভ্যং গ্রীষ্মায় চ নমো নমঃ। বর্ষাভ্যশ্চ শরৎসংজ্ঞ ঋতবে চ নমঃ সদা। হেমন্তায় নমস্তুভ্যং নমস্তে শিশিরায় চ। মাসসম্বৎসরেভ্যশ্চ দিবসেভ্যো নমো নমঃ [২৩]। উত্থানেন ষড়্ঋতুন্নমস্কুর্য্যাৎ। ততঃ সুসুপ্রোক্ষিতমস্তু ইতি মন্ত্রস্তু। নমো বঃ পিতরঃ পিতরোনামো বঃ। ওঁ গৃহান্নঃ পিতরো দত্তঃ। ওঁ সদোঃ বঃ পিতরো দেশ্মঃ। অস্যার্থঃ। হে পিতরঃ বো যুষ্মভ্যঃ নমো হস্ম ভক্তিশ্রদ্ধাতিশয়েন পুনঃ পুনঃ নমস্কারোঽস্ত্বিতি নাপুনকক্তি। নমস্কারাদিনা প্রীতাঃ সন্তঃ পিতরো নো হস্মাভ্যং গৃহানস্মৎকুলদারান্ অত্র চ গৃহিণগৃহীমুচ্যতে ইতি গৃহিণীপ্রার্থনম্ সত

প্রযচ্ছত। বয়ং বো যুষ্মভ্যং পুত্রাত্মপত্তিরূপেণ সদঃ সভাস্থানং দেষ্মঃ দদামঃ। ছান্দসত্বাৎ দিশির্ব্বিকরণলোপঃ দীর্ঘাভাবো গুণশ্চোপধায়াঃ। (২৩) তদনন্তরং সব্যেন পরাবৃত্য বসন্তায় ইতি জপেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ বসন্তায় নমস্তুভ্যং গ্রীষ্মায় চ নমো নমঃ। বর্ষাভ্যশ্চ শরৎসংজ্ঞ ঋতবে চ নমঃ সদা। হেমন্তায় নমস্তুভ্যং নমস্তে শিশিরায় চ। মাসসংবৎসরেভ্যশ্চ দিবসেভ্যো নমো নমঃ। অস্যার্থঃ। বসন্তো জগদাহ্লাদক ঋতুবিশেষঃ। তং প্রত্যক্ষীকৃত্য স্তৌতি তুভ্যং নমঃ। তথা গ্রীষ্মঃ শোষক এব ঋতুস্তস্মৈ নমঃ। তথা বর্ষাঃ সর্ব্বজননাং শস্যোৎপাদকত্বেন স্থিতিকারক ঋতুবিশেষস্তাভ্যো নমঃ। তথা শরদপি মনোহারী ঋতুস্তস্মৈ নমঃ। তথা হেমন্ত শৈত্যসম্বন্ধি হেতুভূত সুখাবহ ঋতুস্তস্মৈ নমঃ। তথা শিশিরোঽপি মনোঽনুকূলসুখসম্পাদক ঋতুস্তস্মৈ নমঃ। তথা দ্বাদশমাসাঃ সম্বৎসরাদিবর্ষাশ্চ স্বীয় স্বীয় প্রয়োজনকত্বেন নমস্যাস্তেভ্যো নম ইতি শ্রাদ্ধকর্ত্তুঃ পিতৄণাং ঋতুবিহিত শ্রাদ্ধদানেনাতিশয় প্রীতিজনকত্বাৎ ঋতুভ্যো নমস্কারদ্বারেণানতিরিত্যর্থঃ। যজুর্ব্বেদিনামপি ষড়ঞ্জলিদানং প্রসঙ্গাল্লিখিতম্। ওঁ নামো বঃ পিতরঃ শুষ্মায় নমো বঃ পিতরস্তপসে নমো বঃ পিতরো যজ্জীবং তস্মৈ। নমো বঃ পিতরো রসায় নমো বঃ পিতরো ঘোরায় মন্যবে

ব্রাহ্মণাগ্রভূমিমাসিঞ্চেৎ [ ২৪ ]। ওঁ অস্ত্বিতি প্রতিবচনম্। ততোঃ দৈবপূর্ব্বকং ওঁ শিবা আপঃ সন্তু [ ২৫ ]। ইতি ব্রাহ্মণে জলং দদ্যাৎ ৩০

ওঁ স্বধায়ৈ পিতরো নমঃ। এষামর্থঃ। হে পিতরো বো যুষ্মভ্যং নমঃ শুষ্মায় চ নমঃ শুষশোষণে ইতি ম প্রত্যয়ঃ। শুষ্মায় শো... গ্রীষ্মায় ইত্যর্থঃ। তথা হে পিতরো বো যুষ্মভ্যং নমঃ। তপসেশিশিরায়ঋতবে চ। তপ ইতি মাঘ মাসস্য নাম। তপা মাঘেঽথ ফাল্গুনে ইত্যমরঃ। তপধূপ সন্তাপে শিশিরে... স্তাপয়তি তাপয়তে রসুন্ ছান্দ সত্বাৎ হ্রস্বঃ ইলোপশ্চ। হে পিতরো বো যুষ্মভ্যং নমঃ যজ্জীবং জলং তস্মৈ নমঃ। জীবনত্বেন জলমুচ্যতে। জলেন বর্ষা... বর্ষাভ্যো নমঃ। তথা হে পিতরো বো নমঃ। রসায় নমঃ রসঃ পুষ্পরসঃ। বসন্তায়নমঃ তদ্যোগাত্তদ্বত্যতিদেশ ইতি রসশব্দেন বসন্ত উচ্যতে। তথা হে পিতরো বো নমঃ ঘোরায় মন্যবে নমঃ হেমন্তায় নম ইত্যর্থঃ। হেমন্তঃ খলু শীতল প্রভুত্বাৎ প্রাণিনাং ভয়হেতুর্ভবতি অতো ঘোরঃ। মন্যুশ্চ দুঃখজনকত্বাৎ মন্যবে ক্রুদ্ধায় যথা কশ্চিৎ দুঃখং মনোদুঃখং জনয়তি তথা অয়মপি শীতলজনকত্বাৎ দুঃখমুৎপাদয়তি। তথা হে পিতরো নমঃ স্বধায়ৈ শরদে নমঃ। তথা চ শ্রুতিঃ। স্বধা বৈ শরৎ স্বধা বৈ পিতৄণামন্নমিতি তদেতৈঃ ষড়্ভিঃ ঋতুনমস্কারৈঃ পিতরস্তৃপ্তা ভবন্তি ঋতবশ্চেতি তাৎপর্য্যম্। (২৪) অথ পিণ্ডাগ্রভূমিমাসিঞ্চেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ সুস্থপ্রোক্ষিতমস্তু। অস্যার্থঃ। ইদং পিণ্ডমমী পস্থানং সুস্থপ্রোক্ষিতং

অতিশয়েন প্রোক্ষিতং ভবতু ইত্যাশংসা। তথা শিবা আপঃ সন্তু। অস্যার্থঃ। এতা আপঃ শ্রাদ্ধকর্ম্মণিনিযুক্তাঃ শিবাঃ কল্যাণপ্রদাঃ সন্তু ইত্যাশংসা। (২৬) তথা সৌমনস্য-
মস্তু। অস্যার্থঃ। সুমনসো ভাবঃ সৌমনস্যং যদত্র শ্রাদ্ধে দত্তং পুষ্পং সৌমনস্যং সুমনসঃ প্রসাদজনকং ভবতু। (২৭) তথা অক্ষতঞ্চারিষ্টঞ্চাস্তু। অস্যার্থঃ। অক্ষতং

ওঁ সন্ত্বিতি প্রতিবচনং। ওঁ সৌমনস্যমস্ত্বিতি (২৬) পুষ্পং দদ্যাৎ। ওঁ অস্ত্বিতি প্রতিবচনম্। ওঁ অক্ষতঞ্চারিষ্টঞ্চাস্তু (২৭) ইতি যবান্
বিকীরেৎ। ওঁ অস্ত্বিতি প্রতিবচনম্। ততো যবাজ্যমধুযুক্তজলং গৃহীত্বা ওঁ অমুক গোত্রস্য নান্দীমুখস্য পিতুরমুক দেবশর্ম্মণঃ
কৃতে ঽস্মিন্ শ্রাদ্ধে সর্ব্বং দত্তমিদমন্নপানাদিকমক্ষয্যমস্ত্বিতি ব্রাহ্মণহস্তে দদ্যাৎ। ওঁ অস্ত্বিতি প্রতিবচনম্। এবমেব পিতামহাদি- ৩০৫
পঞ্চভ্যো ঽক্ষয্যং দদ্যাৎ। ততঃ ওঁ অঘোরা নান্দীমুখাঃ পিতরঃ সন্ত্বিতি বদেৎ (২৮)। ওঁ সন্ত্বিতি প্রতিবচনম্। ওঁ গোত্রংনো
বর্দ্ধতামিতি বদেৎ (২৯)। ওঁ বর্দ্ধতামিতি প্রতিবচনম্। ততঃ সপবিত্র কুশান্ পিণ্ডানামুপর্য্যাস্তীর্য্য। ওঁ নান্দীমুখাঃ পিতরঃ

যব। ইদমক্ষতমরিষ্টং শ্রাদ্ধবিঘ্নকারিণং নিরাশয়তু ঽস্তু ভবতু। (২৮) ততো ঽক্ষয্যদানানন্তরম্। অঘোরা ইতি জপেদিতি কাত্যায়নঃ। মন্ত্রো যথা। অঘোরাঃ
পিতরঃ সন্তু। অস্যার্থঃ। মম পিতরঃ পিতৃপিতামহপ্রপিতামহ প্রভৃতয়ঃ অঘোরা অভয়প্রদাঃ সন্তু ভবন্তু। (২৯) গোত্রং নো বর্দ্ধতাম্। তেষাং শ্রাদ্ধদানেনাতিশয়-

প্রীতিজনকত্বাৎ মগোত্রং সন্ততিং পুত্রপৌত্রাদিরূপাং বর্দ্ধতামিত্যাশংসা। (৩০) তত উর্জ্জমিত্যপো নিষিঞ্চেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ উর্জ্জং বহন্তীরমৃতং ঘৃতং পয়ঃ

প্রীয়ন্তামিতি দৈবব্রাহ্মণং পৃচ্ছেৎ। ততঃ পিতৃপক্ষে ওঁ নান্দীমুখেভ্যঃ পিতৃভ্যঃ প্রীয়ন্তাং ওঁ নান্দীমুখেভ্যঃ পিতামহেভ্যঃ প্রীয়ন্তাং ওঁ নান্দীমুখেভ্যঃ প্রপিতামহেভ্যঃ প্রীয়ন্তাং ওঁ নান্দীমুখেভ্যো মাতামহেভ্যঃ প্রীয়ন্তাং ওঁ নান্দীমুখেভ্যঃ প্রমাতামহেভ্যঃ প্রীয়ন্তাং ওঁ নান্দীমুখেভ্যো বৃদ্ধপ্রমাতামহেভ্যঃ প্রীয়ন্তাং ইতি পৃচ্ছেৎ। ওঁ প্রীয়ন্তামিত্যুত্তরম্। ততঃ সপবিত্র-কুশসহিতপিণ্ডোপরি বারিধারয়া ওঁ উর্জ্জং বহন্তীরমৃতং ঘৃতং পয়ঃ কীলালং পরিশ্রুতং পুষ্ট্যা স্থ তর্পয়ত মে নান্দীমুখান্ পিতৄন্ ইতি সিঞ্চেৎ [ ৩০ ]। ততো ন্যুব্জীকৃতপাত্রমুত্তানীকৃত্য দক্ষিণাং দদ্যাৎ। যথা পিতৃপক্ষে। ওঁ অদ্যেত্যাদি অমুক গোত্রস্যামুক দেবশর্ম্মণো হমুক কর্ম্মাভ্যুদয়ার্থং অমুকগোত্রস্য নান্দীমুখস্য পিতুরমুক দেবশর্ম্মণো হমুক গোত্রস্য নান্দীমুখস্য পিতামহস্যামুক দেব-শর্ম্মণো হমুক গোত্রস্য নান্দীমুখস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ কৃতৈতত্যাভ্যুদয়িক শ্রাদ্ধকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামেতানি দ্রাক্ষা-মলকমূলানি বনস্পতিদৈবতানি তন্মূল্যং বা বিষ্ণুদৈবতং যথাসম্ভব গোত্রনাম্নে ব্রাহ্মণায়াহং দদানি। এবং মাতামহপক্ষেঽপি ততো দৈবে। ওঁ অদ্যেত্যাদি বসুসত্যয়োর্বিশ্বেষাং দেবানাং কৃতৈতদাভ্যুদয়িক শ্রাদ্ধকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং কাঞ্চনং অগ্নিদৈবতং তন্মূল্যং কলং বা বিষ্ণুদৈবতং যথাসম্ভব গোত্রনাম্নে ব্রাহ্মণায়াহং দদানি। ইতি দক্ষিণান্দদ্যাৎ। দেবব্রাহ্মণায় জলগণ্ডূষং দদ্যাৎ। ততঃ ওঁ বিশ্বেদেবাঃ প্রীয়ন্তামিতি ব্রাহ্মণং পৃচ্ছেৎ। ওঁ প্রীয়ন্তামিত্যুত্তরম্। ততঃ প্রাঙ্মুখঃ কৃতাঞ্জলিঃ

কীলালং পরিশ্রুতং স্বধা স্থ তর্পয়ত মে পিতৄন্। অস্যার্থঃ। হে আপো জগৎপ্রাণভূতা যূয়ং স্বধা স্থ নানাবিধমন্নং ভবত ততস্তেনান্নেন পিতৄন্ তর্পয়তেত্যর্থঃ। ইতি প্রার্থনা।

কিং কুর্ব্বতা উর্জ্জং পরমান্নরসমমৃতং ঘৃতং সর্পিঃ পয়ঃ ক্ষীরং কীলালং পক্বমন্নং পরিস্রুতং সুরাং তৎস্বামৃতরূপমেব বহন্তীঃ বহন্ত্যঃ প্রাপয়ন্ত্যঃ। যতো যূয়ং নানাবিধমন্নং বহন্ত্যঃ পুষ্ট্যা ভবত তস্মান্মম পিতৄন্ তর্পয়ত বহন্তীরিতি বিভক্তিব্যত্যয়ঃ। (৩১) বাজে বাজে ইতি বিসৃজ্য অনুব্রজেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ বাজে বাজে ইবত বাজিনো নো ধনেষু বিপ্রা অমৃতা ঋতজ্ঞা অস্য মধ্বঃ পিবত মাদয়ধ্বং তৃপ্তা যাত পথিভির্দ্দেবযানৈঃ। অস্যার্থঃ। বাজো ইন্নং তদস্যাস্তীতি বাজী। তথা চাভিধানকাণ্ডম্। বাজং স্যাদন্নপক্ষয়োরিতি। হে বাজিনঃ পিতর তদিদং শ্রাদ্ধদত্তমন্নং কৃতমকৃতং বা যূয়ং অবত রক্ষত অসুরৈর্যথা ন লুপ্যতে তথা কুরুত। বাজে বাজে অন্নে অন্নে যদা

সুমনাস্তন্মনা ভূত্বা পিতৄন্ বরং যাচেত। ওঁ আশিষো মে প্রদীয়ন্তামিতি বদেৎ। ওঁ আশিষঃ প্রতিগৃহ্যতামিত্যুত্তরম্। ওঁ দাতারো নো ইভিবর্দ্ধন্তাং বেদাঃ সন্ততিরেব চ। শ্রদ্ধা চ নো মাব্যগমদ্বহু দেয়ঞ্চ নো ইস্ত্বিতি। অন্নঞ্চ নো বহু ভবেদতিথীংশ্চ লভেমহি। যাচিতারশ্চ নঃ সন্তু মা চ যাচিষ্ম কঞ্চন। অন্নং প্রবর্দ্ধতাং নিত্যং দাতা শতং জীবতু। যেভ্যঃ সঙ্কল্পিতা দ্বিজাস্তেষামক্ষয়া তৃপ্তিরস্তু। এতাঃ সত্যাশিষঃ সন্তু। পিতৃবর প্রসাদো ইস্ত ইতি পৃচ্ছেৎ। ওঁ সন্তু ইতি প্রতিবচনম্। ততঃ ওঁ দেবতাভ্যঃ পিতৃভ্যশ্চ মহাযোগিভ্য এব চ। নমঃ পুষ্ট্যৈ স্বাহায়ৈ চ নিত্যমেব ভবন্ত্বিতি। ইতি ত্রিঃ পঠেৎ। তত ওঁ বাজে বাজে ইবত বাজিনো নো ধনেষু বিপ্রা অমৃতা ঋতজ্ঞা অস্য মধ্বঃ পিবত মাদয়ধ্বং তৃপ্তা যাত পথিভির্দেবযানৈরিতি মন্ত্রেণ কুশাগ্রেণ পিতৃব্রাহ্মণং বিসৃজ্য পশ্চাৎ কুশমূলেন দেবব্রাহ্মণং বিসর্জ্জয়েৎ (৩১)। ততঃ ওঁ আ মা বাজস্য প্রসবো জগম্যা দেমে দ্যাবাপৃথিবী বিশ্বরূপে আ মা গন্তং

যদৈব পরিকল্পিতং স্যাদন্নং তদা তদৈব অবত রক্ষত ইত্যর্থঃ। ন কেবলমন্নরক্ষিতারো যূয়ং কিঞ্চ ধনেষ্বপি ধনেষু রক্ষাং কুরুত। কিংভূতা যূয়ং বিপ্রা বিপ্রমূর্ত্তিধরাঃ বিপ্রদেহস্থা এব পিতরো ভুঞ্জতে যতঃ। পুনঃ কীদৃশাঃ অমৃতাঃ অমরণধর্ম্মাঃ প্রাপ্তপিতৃদেহত্বাৎ। পুনঃ কীদৃশাঃ ঋতজ্ঞাঃ সত্যশালিনঃ। কিঞ্চ এতৎ সম্বন্ধীনি মধূনি মধুবদানন্দযুক্তানি পিবত পীত্বা চ মাদয়ধ্বং হর্ষযুক্তা ভবত হৃষ্টা ভবত ইত্যর্থঃ। কিঞ্চ তৃপ্তাঃ সন্তোষৈঃ পথিভির্দেবা যান্তি তৈঃ পথিভিঃ যূয়ং গচ্ছত। মধ্ব ইতি ছান্দসঃ

ত্বাৎ আগমো ন ভবতি। (৩২) ততঃ প্রদক্ষিণীকৃত্য প্রণমেৎ ইতি কাত্যায়নঃ। মন্ত্রস্তু ওঁ আ মা বাজস্য প্রসবো জগম্যা দেমে দ্যাবাপৃথিবী বিশ্বরূপে আ মা গন্তম্। পিতরামাতরা যুবমা মা সোমো হমৃতত্বায় গম্যাদিতি। অস্যার্থঃ। বাজস্য শ্রাদ্ধদত্তান্নস্য প্রসবঃ ফলং মা মাং আ জগম্যাৎ পুনঃ পুনরাগচ্ছতু। ইমে দ্যাবাপৃথিবী মা মাং জগম্যেতাং পুনঃ পুনরাগচ্ছতাং কিম্ভূতে দ্যাবাপৃথিবী বিশ্বরূপে বিশ্বং জগৎ তদেব রূপং যয়োস্তে বিশ্বরূপে। হেতেন দ্যাবাপৃথিবীসম্বন্ধি যৎ কল্যাণফলং

পিতরা মাতরা যুব মা মা সোমো হমৃতত্বায় গম্যাৎ। ইতি মন্ত্রেণ প্রদক্ষিণবারিধারয়া ব্রাহ্মণান্ বেষ্টয়েৎ (৩২)। পিতৃপিতামহাদি চরণেভ্যো নমঃ। এবং মাতামহাদীনাং চরণেভ্যো নমঃ ওঁ বিশ্বেভ্যো দেবেভ্যো নমঃ ইতি প্রণমেৎ। ওঁ যেষাং শ্রাদ্ধং কৃতং তেষাং অক্ষয়া তৃপ্তিরস্তু ইতি মন্ত্রেণ পিতৃমাতামহপক্ষস্থান্নং জলে সমর্প্য পশ্চাৎ যয়োঃ শ্রাদ্ধং কৃতং তয়োরক্ষয়া তৃপ্তিরস্তু ইতি দেবপাত্রস্থান্নং সমর্পয়েৎ। ততঃ পিণ্ডান্ গো হজবিপ্রেভ্যো দদ্যাৎ জলে বা ক্ষিপেৎ। শ্রাদ্ধীয় দ্রব্যং ব্রাহ্মণায় দদ্যাৎ জলে বা ক্ষিপেৎ। ততো বামদেব্যগানাশক্তৌ কয়ানশ্চিত্রেত্যাদি মন্ত্রচতুষ্টয়ং ত্রিঃ পঠেৎ (৩৩)। ততো দক্ষিণপাণিনা দীপং প্রচ্ছাদ্য হস্তৌ প্রক্ষাল্যাচম্য ওঁ অদ্যেত্যাদি কৃতৈতদাভ্যুদয়িক শ্রাদ্ধকর্ম্মাচ্ছিদ্রমস্তু ইত্যবধার্য্য ওঁ অদ্যেত্যাদি কৃতৈতদাভ্যুদয়িক শ্রাদ্ধকর্ম্মণি যদ্বৈগুণ্যং জাতং তদ্দোষ প্রশমনায় ওঁ বিষ্ণুস্মরণমহং করিষ্যে ইতি সংকল্প্য তদ্বিষ্ণোরিত্যাদিনা বিষ্ণুং স্মরেদিতি। ততো বৈশ্যদেববলিকর্ম্মণী কুর্য্যাৎ। নিত্যশ্রাদ্ধকরণাকরণয়োর্বিকল্পঃ। শ্রাদ্ধশেষদ্রব্যং যথাকামং ভক্ষণীয়ম্। উপবাসদিনে তদ্ঘ্রাণং নিয়মং পালয়েদিতি ॥ * ॥ 

তৎ মা মা গচ্ছতীত্যাশংসা। কিঞ্চ হে মে মম পিতরামাতরা পিতরৌ যুবং যু বাং মা মাং আগন্তং আগচ্ছতং যদা যদা শ্রাদ্ধং করোমি তদা তদা মম মাতাপিতরা-বাগচ্ছতামিত্যর্থঃ। যুবমিতি প্রথমাদ্বিবচনে ভাষায়ামিতি সূত্রে ভাষাগ্রহণাচ্ছন্দসি আকারো ন ভবতি। আ মা গন্তমিতি ছন্দসত্বাদামঃ ন শপ্লোপঃ ছকারলোপশ্চ নিরুক্তলক্ষণাৎ। কিঞ্চ পিতৃণাং সোমো রাজা মা মাং আগম্যাৎ আগচ্ছতু কিমর্থং অমৃতত্বায় মোক্ষায় তদেবং শ্রাদ্ধং কৃত্বা বিসর্জ্জিতেষু বিপ্রেষু অনুব্রজেন ক্রিয়মাণে

শ্রাদ্ধফলং পার্থিবসুখং স্বর্গসুখঞ্চ মম ভবতু মোক্ষশ্চ ভবত্বিত্যর্থঃ। প্রজানিঃশ্রেয়সার্থমিত্যাপস্তম্বেন শ্রাদ্ধস্য মোক্ষফলত্বাভিধানাৎ। দ্যাবাপৃথিবী ইতি দ্যৌশ্চ পৃথিবী চ ছান্দসত্বাৎ ন দ্বিবচনম্। আজগম্যাদিতি গমের্যঙন্তাৎ লিঙ্ ছান্দসত্বান্নানুস্বারাগমঃ। আগন্তং ব্যবহিতেনাঙাসম্বন্ধঃ। মাতাপিতরাবিত্যর্থে নিপাতনাদাত্বং। (১১) কয়ানশ্চিত্র, কস্ত্বামত্যঃ, অভীষূণঃ সখীনাং স্বস্তি ন ইন্দ্র ইত্যাদি গায়ত্র্যশ্চতস্র ইন্দ্রদেবতাকাঃ শান্তিকর্ম্মণি বিনিযুক্তাঃ মহাবামদেব্যজুষ্টাঃ। চিত্রে চয়নকর্ম্মণি প্রয়োজকঃ ইন্দ্রঃ কয়া ঊতি উত্যাঃ কেন তর্পণেন নোঽস্মাকং সদাবৃধঃ সর্ব্বদা বৃদ্ধিকারী আভুবৎ ভূয়াৎ। কয়া চাবৃতা ক্রিয়য়া বা চিত্রে চ নঃ সখা মিত্রং আভুবৎ কিম্ভূতয়া বৃতা সচীষ্টয়া সচীতি কর্ম্মণো নাম। ইষ্টয়া অতিশয় কর্ম্মবত্যা কেন তর্পণেন কয়া ক্রিয়য়া পরিপাট্যা। ইন্দ্রো নোঽস্মাকং বৃদ্ধিকারী সখা চ ভূয়াদিতি প্রশ্নো বাক্যার্থঃ। ত্বয়া কথিতে বয়ং তদনুতিষ্ঠামঃ পূর্ব্বমনেন নবতিরাহুতিভিঃ সিক্ত ইতি তৎ প্রিয়োঽপ্যয়ং মন্ত্রঃ। উতীতি কৃতিজূতিযূতীত্যাদিনা ক্তিন তৃতীয়ৈকবচনং সুপাং লুগিত্যাদিনা পূর্ব্বসবর্ণঃ। আভুবদিতি লিঙ্গার্থে লোট্ অটাটাবিত্যটধাতোরুবঙিয়শ্চ ইত্যাদিনা উকারলোপশ্ছান্দসঃ। বৃধ ইতি ইগুপধ প্রাজ্ঞেত্যাদিনা কঃ। হে ইন্দ্র কঃ কো রসস্ত্বা ত্বাং মৎসৎ মত্তং করোতি কস্য রসঃ অন্ধসঃ অন্নস্য সোমস্যেতি যাবৎ কিম্ভূতো রসঃ সত্যঃ সোমযাগে ক্রিয়মাণে ঽবশ্যম্ভাবী। পুনঃ কিম্ভূতঃ মদানাং সুরাণাং মধ্যে মংহিষ্ঠো অতিশয়েন মদজনকঃ যেন মদেন মত্তস্ত্বং বসু বসূনি আরুজে ভঞ্জয়সি ত্বয়া কথিতে বয়ং তদনুতিষ্ঠামঃ মংহিষ্ঠ ইতি মহি বৃদ্ধৌ দৃজন্তাচ্ছন্দসীতি ইষ্ঠন্ ভূরিষ্ঠো মেয়ঃস্থিতি দৃচো লোপঃ। মদিতি মদিহর্ষে ণ্যন্তাৎ লেট্ তিপ্ সি বহুলং লেটীতি সিপসিলোপঃ দৃঢ়াচিদিতি শেশ্ছন্দসি বহুলমিতি শমঃ শের্লোপ আরুজে ইতি তিঙাং তিঙো ভবন্তীতি সিপস্থানে উত্তমপুরুষৈকবচনমিট্ বস্বিতি সুপাং সুপলুগিতি শসো লুক্। হে ইন্দ্র নো ঽস্মাকং সখীনাং মিত্রাণাং তথা জরিতৃণাং স্তোতৃণাং অবিতা পালয়িতা ভবাসি ভব। ছন্দসি দীর্ঘঃ অভি আভিমুখ্যেন তথা সুষ্ঠ যথা স্যাৎ কিম্ভূতঃ সন্ শতং স্বয়ং শতধাভূতেত্যর্থঃ। কিমর্থমবিতা ভবাসি উতয়ে বহুপ্রকার রক্ষণায় অভীষূণ ইতি ইকঃ সুঞিতি দীর্ঘঃ সুঞ ইতি যত্বং ণত্বঞ্চ ধাতুভ্যো বহুভ্য ইতি ণত্বং ভবসীতি লেট্ অট্ ধাতুনামনেকার্থত্বাৎ। জীর্য্যতেঃ স্তুতিরর্থঃ নঃ নো ঽস্মভ্যং ইদং স্বস্তি শান্তিং দদাতু কিম্ভূতঃ বৃদ্ধশ্রবাঃ বৃদ্ধানাং শৃণোতীতি স্যুন্ বৃদ্ধবাক্যশ্রবণকারী তথা পূষা বিশ্ববেদাঃ সর্ব্বজ্ঞঃ। তথা তার্ক্ষ্যঃ গরুড়ঃ অরিষ্টনেমিঃ অব্যাহতগতিপ্রসরঃ তথা বৃহস্পতিঃ স্বস্তি নো দধাতু ততশ্চতস্রো গায়ত্র্যস্ত্রিধাবর্ত্তয়িতব্যা ইতি গৃহ্যম্॥ * ॥

অথ নান্দীমুখ শ্রাদ্ধ ব্যবস্থা সংক্ষেপঃ। নান্দীমুখশ্রাদ্ধে আরব্ধে যদ্যশৌচভূকম্পাদিকং তদা তৎ কৃত্বা প্রধানং কর্ম্মকর্ত্তব্যং। নান্দীমুখশ্রাদ্ধং সূর্য্যোদয়মুহূর্ত্তানন্তরং মুহূর্ত্তদ্বয়ে রাক্ষসীবেলাপূর্ব্বকালে বা কার্য্যং। বিবাহাদৌ তু রাক্ষসীবেলাদাবপি কর্ত্তব্যম্। এককর্ত্তৃকৈক দিবসীয়ানেক কর্ম্মানুষ্ঠানে সকৃদেব মাতৃপূজা বৃদ্ধিশ্রাদ্ধম্। সোদরাণামবিভক্তানামপ্যেকদিবসেতত্তৎপুত্রকন্যানাংকর্ম্মকরণেপৃথগেব বৃদ্ধিশ্রাদ্ধং তত্তৎপিতৃত্বেন দেবত্বাৎ। বৃদ্ধিশ্রাদ্ধানন্তরং রাজোপদ্রবাদিনা যদি প্রধানং কর্ম্ম ন কৃতং তদা দিনান্তরে বৃদ্ধিশ্রাদ্ধং কৃত্বা তৎকর্ত্তব্যম্। সামগেতরেণ পিত্রা প্রথম গর্ভাধানে সর্ব্ববেদিনাং পুংসবনসীমন্তোন্নয়নয়োঃ পিত্রাভ্যুদয়িকং কার্য্যম্। পুত্রজন্মপুত্রমুখসন্দর্শননিমিত্তকাভ্যুদয়িকং নাড়ীচ্ছেদাৎ পূর্ব্বং অশৌচব্যপগমে বা পিত্রা কার্য্যম্। নামকরণনিষ্ক্রমণান্নপ্রাশনচূড়োপনয়ন প্রথম বিবাহেষু পিত্রা তদন্যেন বাভ্যুদয়িকং কার্য্যম্। দ্বিতীয়াদি বিবাহে বিবাহকর্ত্রা। ততো বিবাহঃ কর্ত্তব্যঃ। শুদ্ধঃ সুখসুতপ্রদ ইতি বচনাৎ বৃদ্ধিশ্রাদ্ধমবশ্যং কর্ত্তব্যম্। কন্যাবিবাহে পিত্রান্যেন বা কার্য্যম্। মাত্রা বৃদ্ধিশ্রাদ্ধং বিনেব কন্যাদানং কর্ত্তব্যম্। এবং কন্যায়াঃ স্বয়ম্বরণপক্ষে বৃদ্ধিশ্রাদ্ধং বিনৈব স্বদানং কর্ত্তব্যম্। এবংপিতরি জীবত্যসামর্থ্যে অন্যেন পিতুঃ পিত্রাদিমাতামহানাং শ্রাদ্ধং কর্ত্তব্যম্। সংস্কার্য্যপিতুর্ম্মরণাদৌ তু অন্যেন সংস্কার্য্যপিত্রাদিমাতামহাদীনাং শ্রাদ্ধং কর্ত্তব্যম্। কিন্তু অত্রাপি সংস্কার্য্য দেবদত্ত পিতু রিত্যাদ্যভিলাপে প্রযোজ্যং তীর্থযাত্রাপ্রত্যাগমনয়োর্গৃহাদি প্রতিষ্ঠাসু উৎসর্গমাত্রেষপি প্রেতার্থৈকাদশাহবৃষোৎসর্গেতরত্র কার্ত্তিকাদৌ বৃষোৎসর্গে মহাদানাদৌ নবগ্রহমখাযুতহোমাদৌ বা আভ্যুদয়িকং কর্ত্তব্যম্। অগ্ন্যাধানসায়ং প্রাতর্হোমবৈশ্বদেববলিকর্ম্মদর্শপৌর্ণমাসনবজন্মেষ্টীনামেকস্যারম্ভে বৃদ্ধিশ্রাদ্ধে কৃতে অপরেষামারম্ভে তু ন বৃদ্ধিশ্রাদ্ধং। একত্র করণাদেব সর্ব্বেষামাভ্যুদয়িকং পিতুরশৌচান্ত দ্বিতীয় দিনে অগ্ন্যাধানারম্ভে

॥ ● ॥ নান্দীমুখশ্রাদ্ধ ॥ ● ॥

বা বৃদ্ধিশ্রাদ্ধং ন কর্ত্তব্যং। শ্রাদ্ধকৃতঃ শ্রাদ্ধভোক্তুরপি শ্রাদ্ধানন্তর নিষিদ্ধ দানপ্রতিগ্রহসন্ধ্যাদীনামাভ্যুদয়িকে শ্রাদ্ধে ন নিষেধঃ।
নিত্যে ত্বভ্যুদয় শ্রাদ্ধে কৃতে দানাদ্যবর্জ্জনমিতি বচনাদিতি। ইতি ব্যবস্থা॥ * ॥ ইত্যাভ্যুদয়িকশ্রাদ্ধম॥ * ॥

অথামাবস্যাদিক্ষয়নিমিত্তক শ্রাদ্ধ প্রয়োগঃ॥ * ॥ তচ্চ সাগ্নিনা ঔরসেন পার্ব্বণবিধিনা পিতৃপিতামহপ্রপিতামহানাং শ্রাদ্ধং কার্য্যং।
অনগ্নিনাপি যদ্যমাবস্যাশ্বযুক্ কৃষ্ণপক্ষীয় মৃতাহো ভবতি তদা পিত্রোরেবকার্য্যং। অন্যেষামেকোদ্দিষ্টং। অত্র মাতামহানাং শ্রাদ্ধং নাস্তি।
তত্র ওঁ অদ্যেত্যাদি অমুক গোত্রস্য পিতরমুক দেবশর্ম্মণো ঽমাবস্যাক্ষয়নিমিত্তক পার্ব্বণবিধিক সাংবৎসরিক শ্রাদ্ধার্থং অমুক গোত্রস্য
পিতুরমুক দেবশর্ম্মণো ঽমুকগোত্রস্য পিতামহস্যামুক দেবশর্ম্মণো ঽমুকগোত্রস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ পার্ব্বণবিধিক সাংবৎসরিক
শ্রাদ্ধে কর্ত্তব্যে পুরূরবো মাদ্রবসোর্ব্বিশ্বেষাং দেবানাং পার্ব্বণবিধিক সাংবৎসরিক শ্রাদ্ধং দর্ভময় ব্রাহ্মণয়োরহং করিষ্যে। ওঁ কুরুষ্বেতি ৩১১
প্রতিবচনম্। ততঃ ওঁ অদ্যেত্যাদি অমুক গোত্রস্যপিতুরমুক দেবশর্ম্মণো ঽমাবস্যাক্ষয়নিমিত্তক পার্ব্বণবিধিক সাংবৎসরিক শ্রাদ্ধার্থং
অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণোঽমুক গোত্রস্য পিতামহস্যামুক দেবশর্ম্মণোঽমুক গোত্রস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ পার্ব্বণবিধিক
সাংবৎসরিক শ্রাদ্ধং দর্ভময়ব্রাহ্মণে ঽহংকরিষ্যে। ওঁ কুরুষ্বেতি প্রতিবচনং। এবং মাতুরপি পার্ব্বণবিধিনা শ্রাদ্ধে মাতৃপিতামহী।
প্রপিতামহীনাং অনুজ্ঞাবাক্যং। মলমাসীয় ভাদ্রকৃষ্ণপক্ষ মৃতস্য বর্ষাভ্যন্তরে ঽশ্বযুক্ কৃষ্ণপক্ষেঽপি ন পার্ব্বণং তস্য প্রেতপক্ষ মৃতত্বাভাবাৎ-
তদব্দে আষাঢ়ী সপ্তম পক্ষস্যৈব প্রেতপক্ষত্বং নভো বাথ নভস্যো বা মলমাসো যদা ভবেৎ। সপ্তমঃ পিতৃপক্ষস্যাদন্যত্রৈব তু পঞ্চম ইতি
হেমাদ্রিমাধবাচার্য্যধৃত বচননাগরখণ্ডাৎ। এবঞ্চ মৃতাহ পার্ব্বণবিধিক শ্রাদ্ধমশৌচাদি পতিতমশৌচান্তাদৌ পার্ব্বণবিধিনৈব কার্য্যং।

যদি বর্ষমধ্যেতন্নকৃতং পুনর্ম্ম তাশ্চপ্রাপ্তস্তত্রাহ্নি প্রাকৃত শ্রাদ্ধং বিধায় পরত্রৈকাদশ্যাং পতিতশ্রাদ্ধং কর্ত্তব্যং তয়ো পৌর্ব্বাপর্য্যনিয়মা-
ভাবাৎ। অপকৃষ্য যদি সপিণ্ডনং কৃতং তদা তেনৈব সাংবৎসরিক শ্রাদ্ধসিদ্ধের্ন পূর্ণসংবৎসরে আব্দিকান্তরমিতি দ্বিতীয়াব্দেতু পক্কান্নেন-
পুত্রকন্যাদিভিঃ পৃথক্ পৃথক্ সাংবৎসরিক শ্রাদ্ধং কর্ত্তব্যং ॥ * ॥ * ॥ * ॥

অথ সাম্বৎসরিকৈকোদ্দিষ্ট শ্রাদ্ধ প্রয়োগঃ ॥ * ॥ তত্র পূর্ব্বদিনে নিরামিষং সকৃদ্ভোজনং কৃত্বা পরদিনে দেবপূজান্তং
কর্ম্ম কৃত্বা দক্ষিণাভিমুখীভূয় পাদৌ প্রক্ষাল্য দর্ভহস্তঃ প্রাঙ্মুখ উদঙ্মুখো বা দ্বিরাচম্য গোময়েনোপলিপ্তায়াং ভূমৌ মধ্যাহ্নে
শ্রাদ্ধপর্য্যদস্তেতর কালে বা দর্ভাসনে চোপবিশ্য তিলতৈলেন দীপং প্রজ্বাল্য ভোজ্যাদিকমুৎসৃজেৎ। তদযথা। ভোজ্যাদিকমানীয় এতে
গন্ধপুষ্পে ওঁ সোপকরণভোজ্যায় নমঃ। ইতি ত্রিঃ সংপূজ্য এতে গন্ধপুষ্পে এতদধিপিতয়ে ওঁ বিষ্ণবে নমঃ। এতে গন্ধপুষ্পে ৩১২
এতৎ সম্প্রদানায় ওঁ ব্রাহ্মণায় নমঃ ইতি সংপূজ্য কুশত্রয়সহিতজলমাদায় ওঁ অদ্যামুকে মাসাামুক পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য
পিতুরমুক দেবশর্ম্মণঃ সাম্বৎসরিক শ্রাদ্ধবাসরে অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণঃ স্বর্গকাম ইদং সোপকরণ ভোজ্যং বিষ্ণুদৈবতং যথা-
নাম গোত্রায় ব্রাহ্মণায়াহং দদানি। ততো দক্ষিণা। যথা এতে গন্ধপুষ্পে ওঁ ফলায় নমঃ ইতি ত্রিঃ সংপূজ্য ওঁ অদ্যেত্যাদি
কৃতৈতৎ সোপকরণ ভোজ্যদানকর্ম্মণঃ সাঙ্গতার্থং দক্ষিণামিদং ফলং বিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানি। ততঃ দক্ষিণ-
পাণৌ কৌশদ্বিদলরূপ পবিত্রং বামে বহুতরকুশান্ ধৃত্বা ওঁ বাস্তুপুরুষায় নমঃ। ইতি গন্ধাদিনা বাস্তুং সংপূজ্যান্নং দত্ত্বা ওঁ তদ্বিষ্ণোঃ
পরমং পদং সদা পশ্যন্তি সূরয়ঃ দিবীব চক্ষুরাততম্। ইত্যনেন হরিং স্মৃত্বা যজ্ঞেশ্বরং গন্ধাদিনা সংপূজ্য এতৎ শ্রাদ্ধীয়াগ্রভাগ-

(১) ততস্তিলান্ বিকীর্য্য অসুরান্নিরস্যতীতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ অপহতাসুরারক্ষাংসি বেদিষদঃ। অস্যার্থঃ। অস্মিন্ শ্রাদ্ধার্থমুপকল্পিতে অন্নে হে অসুরা অপহত অপগচ্ছত দূরীভবত ইত্যর্থঃ। কিম্ভূতাস্তে বেদিষদঃ বেদ্যাং সীদন্তি তিষ্ঠন্তীতি শ্রাদ্ধপরিষ্কৃতায়াং ভূমৌ যে বিঘ্নার্থমাগচ্ছন্তস্তে যূয়ং নিরস্তা ভবতেতি বাক্যার্থঃ।



সঘৃত সোপকরণান্নং যজ্ঞেশ্বরায় ওঁ বিষ্ণবে নমঃ। ইত্যনেন শ্রাদ্ধীয়াগ্রভাগং দত্ত্বা পরকীয় ভূমৌ চেৎ তৎস্বামিনে মূল্যমথবা পিতৃরীত্যা এতদন্নং সোপকরণং এতদ্ভূস্বামিপিতৃভ্যঃ স্বধা ইত্যগ্রভাগং দদ্যাৎ। ততঃ উপবীতী দর্ভবটুং স্নাপয়িত্বা এতে গন্ধ-পুষ্পে ওঁ কুশময়া ব্রাহ্মণায় নমঃ। ইতি সংপূজ্য দক্ষিণামুখঃ প্রাচীনাবীতী পাতিতবামজানুস্তিলপ্রোক্ষিতদক্ষিণাগ্রৈকদর্ভযুক্তাসনে দর্ভবটুং সংস্থাপ্য জলগণ্ডূষং দত্ত্বা ওঁ অদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণঃ একোদ্দিষ্টবিধিক সাম্বৎসরিক শ্রাদ্ধং দর্ভময় ব্রাহ্মণে ত্বহং করিষ্যে। ওঁ কুরুষ্বেতি প্রতিবচনম্। ততঃ সপ্রণবব্যাহৃতিকাং গায়ত্রীং জপেৎ। ততঃ ওঁ দেবতাভ্যঃ পিতৃভ্যশ্চ মহাযোগীভ্য এব চ। নমঃ স্বধায়ৈ স্বাহায়ৈ নিত্যমেব ভবন্ত্বিতি ইতি ত্রিঃ পঠেৎ। ততঃ পুণ্ডরীকাক্ষং স্মরেৎ। ততো মুক্তজ-লেন শ্রাদ্ধীয় দ্রব্যপ্রোক্ষণং কর্ত্তব্যম্। রক্ষার্থমুদকপাত্রমেকদেশে স্থাপয়েৎ। ততো ব্রাহ্মণায় জলং দত্ত্বা ওঁ অমুক গোত্র পিতর-মুক দেবশর্ম্মন্নেতত্তে দর্ভাসনং স্বধা ইত্যুৎসৃজ্য ব্রাহ্মণবামপার্শ্বে মোটকং দদ্যাৎ। তত ওঁ অপহতাসুরারক্ষাংসি বেদিষদ (১) ইতি তিলান্ বিকীর্য্য ব্রাহ্মণাগ্রভূমৌ কুশপত্রমেকং দক্ষিণাগ্রং পাতয়িত্বা তদুপরি পাত্রং সংস্থাপ্য ওঁ পবিত্রাসি বৈষ্ণবী ইত্য-নেনানখচ্ছিন্নং প্রাদেশমাত্রং ওঁ বিষ্ণোর্মনসা পূতমসীত্যনেন প্রোক্ষিতৈকদলকং পবিত্রং তৎপাত্রে নিধায় ওঁ শন্নো দেবীর-



যজুর্ব্বেদে তু অপহতা অসুরা ইতি পাঠঃ তদেবং ব্যাখ্যানম্। হে শ্রাদ্ধবিঘ্নকারিণো অত্র শ্রাদ্ধার্থমুপকল্পিতে হব্নে অসুরাস্তে অপহতা অপসারিতা দূরীভূতা ইত্যর্থঃ।

(২) ততঃ পাত্রেষু জলং দদ্যাৎ শন্নো দেবীরিতি কাত্যায়নঃ। মন্ত্রো যথা। শন্নো দেবীরভিষ্টয়ে শন্নো ভবন্তু পীতয়ে শংযোরভিস্রবন্তু নঃ। অস্যার্থঃ। এতা অর্ঘ্যার্থমুপ-কল্পিতা আপো নো ঽস্মাকং শং ভবন্তু কল্যাণপ্রদা ভবন্ত্বিত্যর্থঃ। কিম্ভূতা আপঃ দেবীর্দেব্যঃ দেবনাদিগুণযুক্তাঃ। কিমর্থমভিষ্টয়ে উপচারার্থং পীতয়ে পানার্থং অভীষ্টয় ইত্যর্থে ছান্দসত্বাৎ হ্রস্বঃ। কিঞ্চ নো ঽস্মাকং শংযোঃ কল্যাণং সংযোগায় অভিস্রবন্তু অভিমুখা ভবন্তু ইত্যাশংসাবাক্যার্থঃ। শংযোরিতি চতুর্থ্যর্থে ষষ্ঠী। দেবীরিতি সুপাং সুপ ইতি জসস্থানে শস্। বিভক্তিব্যত্যয়াৎ। (৩) তত একৈকস্মিন্নপি পাত্রে তিলান্ নির্ব্বপেদিতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ তিলো ঽসি সোমদেবত্যো গোষব্যো দেব-নির্ম্মিতঃ প্রত্নমদ্ভিঃ পৃক্তঃ স্বধয়া পিতৄন্ লোকান্ প্রীণাহি নঃ স্বাহা। অস্যার্থঃ। তিলস্ত্বমসি। কিম্ভূতঃ সোমদেবত্যঃ সোমো দেবতা অস্যেতি দেবতার্থে যৎপি রূঢ়িতঃ।

ভিষ্টয়ে শন্নো ভবন্তু পীতয়ে শংযোরভিস্রবন্তু নঃ [২]। ইত্যনেন জলং তৎপাত্রে দদ্যাৎ। ততঃ ওঁ তিলোঽসি সোম দেবত্যো-গোষবো দেবনির্ম্মিতঃ। প্রত্নমদ্ভিঃ পৃক্তঃ স্বধয়া পিতৄন্ লোকান্ প্রীণাহি নঃ স্বাহা (৩) ইত্যনেন তিলা দেয়াঃ। তূষ্ণীং গন্ধ-পুষ্পে দত্ত্বা পাত্রং কুশেন পিধায় ওঁ অচ্ছিদ্রমিদমর্ঘ্যপাত্রমস্তু ইত্যবধারয়েৎ। ওঁ অস্ত্বিত্যুত্তরম্। ব্রাহ্মণহস্তে দক্ষিণাগ্রং অর্ঘ্য পাত্রীয় পবিত্রং দত্ত্বা জলান্তরং পুষ্পান্তরঞ্চ দত্ত্বা পুষ্পান্তরেণ ওঁ শিরঃপ্রভৃতি সর্ব্বগাত্রেভ্যো নমঃ। ইতি পূজয়েৎ। ততস্তৎপাত্রং বামহস্ততলে কৃত্বা দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা আপঃ পয়সা সংবভূবুর্যা অন্তরীক্ষা উত পার্থিবীর্যা হিরণ্যবর্ণা যজ্ঞিয়াস্তা ন 

কশ্চিদধিকারান্ন বৃদ্ধিঃ। পুনঃ কীদৃশঃ গোষবঃ গাং স্বর্গং সূতে দদাতি গোষবঃ যতস্তিলো হয়ং দত্তঃ সন্ দাতুঃ পাপাপনয়নানন্তরং স্বর্গপ্রাপ্তিঃ স্যাৎ। অপি কীদৃশঃ দেব-নির্ম্মিতঃ দেবেন বিষ্ণুনা নির্ম্মিতঃ। তথা চ শ্রুতিঃ। বিষ্ণুদেহোদ্ভবাঃ পুণ্যাস্তিলা ইতি। পুনঃ কীদৃশঃ অদ্ভিঃ পৃক্তঃ জলমিশ্রিতঃ যত এবম্ভূতস্ত্বং তদস্মাকং পিতৄন্ লোকান্ পিতৃপিতামহ প্রপিতামহ প্রভৃতীন্ প্রত্নং চিরকালং যথা স্যাত্তথা স্বধয়া স্বধাকারেণ প্রীণাহি প্রীতান্ কুরু। প্রীণাহীতি ছান্দসত্বাদীকারো ন ভবতি। যদ্যপি পিতৃকর্ম্মণি স্বাহাকারো ন যুক্তস্তথাপি কাত্যায়নেন মহর্ষিণা স্বাহাকারেণ মন্ত্রস্য পঠিতত্বাৎ ন কাচিদনুপপত্তিরাশঙ্কনীয়া। প্রত্নমিতি কশ্চিদব্যয়মিত্যাচষ্টে পরমার্থতস্তু প্রযত্নশব্দস্য

নিপাতনাদ্বহুলং বলুগিতি বলুক্। প্রত্নমিতি প্রযত্নং যথা স্যাদিতি যথাচাভিধানকাণ্ডম্। চিরকালে প্রযত্নে চ প্রত্নমিত্যভিধীয়তে। (৪) একৈকেস্য একৈকেন দদাতীতি কাত্যায়নঃ। ওঁ যা দিব্যা আপঃ পয়সা সংবভূবুর্যা অন্তরীক্ষা উত পার্থিবীর্যা হিরণ্যবর্ণা যজ্ঞিয়াস্তা ন আপঃ শিবাঃ শং শ্যোনাঃ সুহবা ভবন্তু। অস্যার্থঃ। আপঃ পানীয়ানি পয়সা ক্ষীরেণ সংবভূবুঃ গন্ধতাঃ মাধুর্য্যশৈত্যাদিনা একীভাবমাপন্নাঃ কাস্তা আপঃ যা দিব্যাঃ দিবি স্বর্গে ভূতাঃ যা অন্তরীক্ষাঃ আকাশভবাঃ উত অপার্থে যাঃ পার্থিবীঃ পৃথিবীসম্বন্ধাঃ। পুনঃ কীদৃশঃ হিরণ্যবর্ণাঃ রজতবদ্বিশুদ্ধাঃ। হিরণ্যং রজতেঽপি দৃশ্যতে। তথাচ। হিরণ্যং রজতেঽপি স্যাৎ সুবর্ণে চ কপর্দ্দকে। পুনঃ কীদৃশঃ যজ্ঞিয়াঃ

আপঃ শিবঃ শং শ্যোনাঃ সুহবা ভবন্তু [ ৪ ] ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতত্তে ঽর্ঘ্যং স্বধেতি দদ্যাৎ। সংস্রবগ্রহণন্ন্যুব্জীকরণং ন কর্ত্তব্যম্। ততস্তৎ পাত্রং পরিত্যজ্য গন্ধাদিকমুৎসৃজ্য ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতানি তে গন্ধপুষ্পধূপদীপাচ্ছাদনানি স্বধেত্যুৎসৃজ্য এষ তে গন্ধঃ এতত্তে পুষ্পং এষ তে ধূপঃ এষ তে দীপঃ এতত্তে আচ্ছাদনম্। ইতি প্রত্যেকং নিবেদয়েৎ। ওঁ গন্ধাদি দানমিদমচ্ছিদ্রমস্তু ইত্যবধারয়েৎ। ওঁ অস্ত্বিত্যুত্তরম্। ততঃ বস্ত্রযজ্ঞোপবীত স্বপ্রিয় পিতৃপ্রিয়ং দ্রব্যং যথাশক্তি দদ্যাৎ। ততো ব্রাহ্মণাগ্রস্থিতং কুশাদিকমমন্ত্রকমেবাপানীয় নৈর্ঋতীমারভ্য দক্ষিণাগ্রয়া জলধারয়া বামাবর্ত্তেন চতুষ্কোণ মণ্ডলং কৃত্বা অন্নপাত্রং পাতয়িত্বা সর্ব্বমন্নাদিকং পাত্রান্তরিতহস্তাভ্যাং পত্নী স্বয়ম্বা পরিবেশয়েৎ। ততঃ ওঁ ইদং বিষ্ণুর্বিচক্রে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে [ ৫ ] বিষ্ণো কব্যমিদং রক্ষস্ব ইতি চ পঠিত্বানখমঙ্গুষ্ঠং ক্ষিপেৎ। ততঃ ওঁ অপহতাসুরা রক্ষাংসি ৩২৫

যজ্ঞার্হাঃ তদর্হতীতি ঈয় প্রত্যয়ঃ ছন্দসি বহুলমিতি হ্রস্বঃ। তদেবম্ভূতা আপো নো ঽস্মাকং শিবা ভবন্তু কল্যাণপ্রদা ভবন্ত্বিত্যর্থঃ। ন কেবলং কল্যাণপ্রদা এব কিন্তু শং শ্যোনাঃ সুখপ্রদা অপি ভবন্তু। ন কেবলং শংশ্যোনা এব সুবহা অপি তু সন্তু ব্রাহ্মণহস্তে দত্তাঃ সুখেনাহূতা ভবন্তু ইত্যর্থঃ। শৈত্যাদিগুণেনাভিব্যঞ্জকেন ব্রাহ্মণস্য সুখসম্পাদকা ভবন্তু ইত্যর্থঃ। শ্যোনা ইতি সুখস্য নাম নিরুক্তে চ দৃশ্যতে। শ্যোনঃ স্যাৎ সুখতৃষ্ণয়োরিতি। পার্থিবীরিতি বিভক্তি ব্যত্যয়ে প্রথমায়াং দ্বিতীয়েতি। (৫) বৈষ্ণবাস্ত্রং

যত্রাঙ্গুষ্ঠমন্নে অবগাহয়েতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ ইদং বিষ্ণুর্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে। অস্যার্থঃ। বিষ্ণুর্ভগবান্ বিশ্বব্যাপিতয়া ইদমন্নং বিচক্রমে আক্রান্তবান্। কিঞ্চ বিষ্ণুরেব পদমস্মিন্নন্নে নিদধে নিহিতবান্ কেন প্রকারেণ ত্রেধা ত্রিঃ প্রকারম্। কুত্র কুত্র পৃথিব্যাং আকাশে স্বর্গে চ অস্য বিষ্ণোঃ পদং যতো

বেদিষদ ইতি তিলান্ বিকীর্য্য ব্রাহ্মণায় জলগণ্ডূষং দত্ত্বা গায়ত্রীং জপেৎ। ততো হন্নে মধু দেয়ং তদভাবে গুড়ং দেয়ম্। ততঃ সপ্রণবব্যাহৃতিকাং গায়ত্রীং ওঁ মধুবাতেতি পঠিত্বা ওঁ মধু মধু মধ্বিতি চ জপেৎ। ততো বামহস্তেনান্নপাত্রং ধৃত্বা ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতত্তে হন্নং সোপকরণং স্বধেত্যুৎসৃজ্য জলগণ্ডূষং দত্ত্বা ওঁ ইদমন্নং ইমা আপঃ ইদং হবিঃ এতান্যুপকরণানি যথাসুখং বাগ্যতঃ সদ ইতি ব্রূয়াৎ। ততঃ সপ্রণবব্যাহৃতিকাং গায়ত্রীং মধুবাতেত্যৃচং ওঁ মধু মধু মধ্বিতি চ। ওঁ অন্নহীনং ক্রীয়াহীনং বিধিহীনঞ্চ যদ্ভবেৎ। তৎ সর্ব্বমচ্ছিদ্রমস্ত্বিত্যুক্ত্বা শ্রব্যং পঠেৎ। তদ্যথা সপ্রণব ব্যাহৃতিকাং গায়ত্রীং মধুবাতা ইত্যাতি ত্র্যৃচং মধু মধু মধ্বিতি চ যজ্ঞেশ্বরো হব্য ইতি ওঁ যোগীশ্বরমিতি। ওঁ মন্বত্রিবিষ্ণুহারীতেতি, ওঁ তদ্বিষ্ণোঃ পরমং পদমিতি, ওঁ দুর্য্যোধনো মন্যুময় ইতি। ওঁ যুধিষ্ঠিরো ধর্ম্মময় ইতি ওঁ সপ্তব্যাধা ইতি। ততো দক্ষিণাগ্রান্ কুশানাস্তীর্য্য হস্তস্থমন্নং ওঁ অগ্নি-দগ্ধাশ্চ যে জীবা যেহপ্যদগ্ধাঃ কুলে মম। ভূমৌ দত্তেন তৃপ্যন্তু তৃপ্তা যান্তু পরাং গতিম্। ওঁ যেষাং ন মাতা ন পিতা ন বন্ধুর্নৈবান্নসিদ্ধির্ন তথান্নমস্তি তত্তৃপ্তয়ে হন্নং ভুবি দত্তমেতৎ প্রয়ান্তু লোকায় সুখায় তদ্বৎ [৬]। ইতি মন্ত্রাভ্যাং ব্রাহ্মণাগ্রভূমৌ সতিলজলপ্রো- ৩১৬

গতং অতঃপাংশুলে পাংশুযুক্তে ভূদেশে সমূঢ়ং সমূলং সম্যক্ নিবিষ্টং তদয়ং বাক্যার্থঃ। বিষ্ণুর্ভগবান্ ত্রিবিক্রমরূপেণ ঊর্দ্ধমধ্যাধোব্যাপ্তস্তস্য পদং বিশেষতঃ পৃথিব্যাং নিবিষ্টং স বিষ্ণুরিদমন্নমাক্রান্তবান্ অতো রাক্ষসাদয়োহত্রাপসরন্ত্বিত্যর্থঃ। (৬) তত্র তৃপ্তিং জ্ঞাত্বান্নং বিকীরেৎ ইতি কাত্যায়নঃ। মন্ত্রস্তু পৌরাণিক এব।

ওঁ অগ্নিদগ্ধাশ্চ যে জীবা যেঽপ্যদগ্ধাঃ কুলে মম। ভূমৌ দত্তেন তৃপ্যন্তু তৃপ্তা যান্তু পরাং গতিম্। ওঁ যেষাং ন মাতা ন পিতা ন বন্ধুর্নৈবান্নসিদ্ধির্ন তথান্নমস্তি। তত্তৃপ্তয়েঽন্নং ভুবি দত্তমেতৎ প্রয়ান্তু লোকায় সুখায় তদ্বৎ। অস্যার্থঃ। মম কুলে বংশে যে জীবাঃ প্রাণিনো ঽগ্নিদগ্ধা লৌকিকাগ্নিনা যেন কেনাপি দগ্ধা এব পিণ্ডোদকভাজো ন ভূতাস্তথাপি যে দুর্ভিক্ষমরণে ঽদগ্ধা দাহমেব ন লভন্ত স্তে জীবা মামকা মদ্দত্তেন বিকীরণান্নেন তৃপ্যন্তু তৃপ্তাঃ সন্তঃ পরাং গতিং উৎকৃষ্ট স্থানং প্রয়ান্তু গচ্ছন্তু। তথা যেষাং জীবনাং মাতৃপিতৃপ্রভৃতয়ো বান্ধবা ন বিদ্যন্তে শ্রাদ্ধদায়িনস্তেষামপি তৃপ্তয়ে ভুবি ভূমৌ অন্নং দত্তং ময়েতি শেষঃ। তেনান্নেন তৃপ্তাঃ সন্তঃ সুখায় লোকায় স্বর্গাখ্যায় প্রয়ান্তু গচ্ছন্তু। গত্যর্থকর্ম্মণীতি কর্ম্মণি চতুর্থী। (৭) ততো মধুবাতেতি মন্ত্রিতং মধু দদ্যাদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ মধুবাতা ঋতায়তে

ক্ষিতদক্ষিণাগ্র কুশোপরি বিকীরেৎ। ততো হস্তৌ প্রক্ষাল্যাচম্য হরিং স্মৃত্বা ব্রাহ্মণায় জলগণ্ডূষং দদ্যাৎ। ততঃ পূর্ব্ব-বদ্গায়ত্রীং পঠিত্বা ওঁ মধুবাতা ঋতায়তে মধু ক্ষরন্তু সিন্ধবঃ মাধ্বীর্নঃ সন্ত্বোষধীঃ ওঁ মধু নক্তমুতোষসো মধুমৎ পার্থিবং রজঃ মধু দ্যৌরস্তু নঃ পিতা ওঁ মধুমান্নো বনস্পতির্মধুমাংঅস্তু সূর্য্যো মাধ্বীর্গাবো ভবন্তু নঃ (৭) ইতি পঠিত্বা ওঁ শেষমন্নং ক দেয়মিতি পৃচ্ছেৎ। ওঁ ইষ্টেভ্যো দীয়তামিত্যুত্তরম্। ততঃ ওঁ পিণ্ডদানমহং করিষ্যে ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেত্যুত্তরম্। তত উচ্ছিষ্ট- ৩১৭

মধু ক্ষরন্তু সিন্ধবঃ ওঁ মাধ্বীর্নঃ সন্ত্বোষধীর্মধু নক্তমুতোষসো মধুমৎ পার্থিবং রজঃ ওঁ মধু দ্যৌরস্তু ন পিতা মধুমান্নো বনস্পতির্মধুমাংঅস্তু সূর্য্যো মাধ্বীর্গাবো ভবন্তু নঃ। অস্যার্থঃ। মধুদানে তৃপ্তাঃ পিতরো ঽভিলপন্তি। বাতা একোনপঞ্চাশৎ মধু ঋতায়তে মধু বহন্তু মধুদা ভবন্তু। তথা সিন্ধবো নদ্যঃ মধু ক্ষরন্তু স্রবন্তু। তথা নো ঽস্মাকং ওষধীরোষধ্যো ধান্যাদয়ো মাধ্বীঃ সন্তুঃ মধুফলা ভবন্তু ইত্যর্থঃ। তথা নক্তং রাত্রয়ো মধুরূপা ভবন্তু। তথা উষসঃ কালবিশেষাঃ মধুযুক্তা ভবন্তু। তথা পার্থিবং রজো ধুলয়ঃ পৃথিবীসম্বন্ধীনি রজাংসি মধুমন্তি ভবন্তু। তথা দ্যৌরাকাশং মধু অস্তু অধিষ্ঠানরূপেণ মধুময়ং ভবতু। কচিৎ দ্যৌঃ স্বর্গঃ পিতেব সর্ব্বস্যাধিগম্যত্বাদিতি পিতৃপদং বিশেষণং কৃতম্। তথা নো ঽস্মাকং পিতা মধুমানস্তু ভবতু। তথা নো ঽস্মাকং বনস্পতিকদ্যানতরবো মধুফলা ভবন্তু। তথা সূর্য্যো জগদেকসাক্ষী মধুময়ো ভবতু। পূর্ব্ববদর্থমঙ্গতত্ত্বাৎ

অন্তেরাদিলোপঃ। তথা নো হস্মাকং গাবো মাধ্বীঃ মধুক্ষীরিণ্যো ভবন্তু ইত্যাশংসা বাক্যার্থঃ। ঋতায়ত ইতি ঋতশব্দাদায়প্রত্যয়ে তিঙাং তিঙিতি বহুবচনে একবচনং মাধ্বীরিতি বিভক্তিব্যত্যয়ে প্রথমায়াং দ্বিতীয়া এবমোষধীরিত্যত্রাপি। উষসশ্ছান্দসত্বান্ন সুনাগমঃ। (৮) বিকীরণানন্তরং ভূমৌ রেখাং কুর্য্যাৎ। ইতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ নিহন্মি সর্ব্বং যদমেধ্যবদ্ভবেদ্ধতাশ্চ সর্ব্বে হস্থরদানবা ময়া। রক্ষাংসি যক্ষাঃ সপিশাচসঙ্ঘা হতা ময়া যাতুধানাশ্চ সর্ব্বে। অস্যার্থঃ। অস্মিন্ প্রকৃতে কর্ম্মণি যদমেধ্যবৎ যদ-

সন্নিধৌ যত্রাচমনবিন্দবো ন প্রাপ্নুবন্তি তত্র নিহন্মি সর্ব্বং যদমেধ্যবদ্ভবেদ্ধতাশ্চ সর্ব্বে হসুরদানবা ময়া। রক্ষাংসি যক্ষাঃ সপিশাচ-সংঘা হতা ময়া যাতুধানাশ্চ সর্ব্বে (৮) ইত্যনেন নৈর্ঋতীমারভ্য জলরেখয়া বামবর্ত্তেন চতুষ্কোণ মণ্ডলং কৃত্বা প্রাদেশ-মাত্রং সাগ্রকুশপত্রদ্বয়ং গৃহীত্বা বামহস্তান্বারব্ধদক্ষিণহস্তেন দক্ষিণাগ্রাং রেখাং মধ্যস্থানে অপহতানিহন্মিভ্যাং কুর্য্যাৎ। তদ্দর্ভ-দ্বয়মুত্তরস্যাং দিশি ক্ষিপেৎ। ততঃ রেখোপরি সমূলাগ্রান্ কুশানাস্তীর্য্য ওঁ এহি পিতঃ সৌম্য গম্ভীরেভিঃ পথিভিঃ পূর্ব্বিণে-ভির্দেহস্মভ্যং দ্রবিণেহ ভদ্রং রৈঞ্চ নঃ সর্ব্ববীরং নিযচ্ছত (৯) ইত্যাবাহ্য তিলাংশ্চাস্তীর্ণকুশোপরি বিকীরেৎ। ততঃ সতিলজল- ৩১৮

পবিত্রভূতং অবিহিতাচরণাচারাদিরূপেণ যদসাঙ্গরূপং তন্নিহন্মি নিরস্যামি তথা যদত্রাস্থরদানবাদয়ো বিঘ্নকারিণস্তেহপি হতা নিরস্তাঃ সর্ব্ব এব অতস্তেষামত্রানবরস ইত্যভি-প্রায়ঃ। (৯) মন্ত্রো যথা। এত পিতরঃ সোম্যাসো গম্ভীরেভিঃ পথিভিঃ পূর্ব্বিণেভির্দত্তাস্মভ্যং দ্রবিণেহ ভদ্রং রৈঞ্চ নঃ সর্ব্ববীরং নিযচ্ছত। অস্যার্থঃ। হে পিতরঃ পিতৃ-

পিতামহপ্রপিতামহমাতামহপ্রমাতামহ বৃদ্ধপ্রমাতামহপ্রভৃতয়ো হস্মিন্নাস্তৃতে বর্হিষি এত আগচ্ছত। কিন্তু তা যূয়ং সোম্যাসো সোম্যো দেবতা যেষাং ইত সোম্যাসঃ সোমাস ইতি টাপ। সোম্য পূর্ব্ববজ্জসেরসুগাগমঃ। কৈরাগমনমিত্যাকাঙ্ক্ষায়ামাহ। পথিভিরিতি কিন্তু তৈঃ গম্ভীরেভিঃ গম্ভীরৈর্দেবাদীনাং প্রসিদ্ধবর্ত্মভিরিত্যর্থঃ। পুনঃ কিন্তু তৈঃ পূর্ব্বিণেভিঃ পূর্ব্বপুরুষাণাং কব্যবাহনাদীনাং গমনাগমনপ্রসিদ্ধ বর্ত্মভিরিত্যর্থঃ। আগত্য চ নো হস্মাকং ভদ্রং কল্যাণং দ্রবিণে ক্রমাগত ধনে চ দত্ত কুরুত। হ ইতি সম্বোধন



পাত্রং দক্ষিণহস্তেন গৃহীত্বা ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতত্তে হবনেনিক্ষ্ব স্বধা। ইতি কুশমূলে হবনেজয়েৎ। ততো মধ্বাজ্যতিলভুক্তং পিণ্ডং কৃত্বা দক্ষিণহস্তেন গৃহীত্বা বামহস্তগৃহীতজলপাত্রো হরিং স্মৃত্বা ওঁ মধুবাতা ইত্যাদিনা মধু মধ্বি ত্যন্তং পঠিত্বা ওঁ অক্ষন্নমীমদন্ত হ্যব প্রিয়া অধূষত অস্তোষতঃ স্বভানবো বিপ্রান্ বিষ্ঠয়া মতীয়ো যান্বিন্দ্রতে হরী (১০) ইতি

বাচকঃ। ন কেবলং লব্ধবিত্তে কিঞ্চ রৈঞ্চ লভ্যরূপং ধনঞ্চ যৎ তৎ সর্ব্বং নিযচ্ছত রৈমিতি ছান্দসত্বাৎ নিরুক্তলক্ষণেন অমো হকারলোপঃ। কিন্তু তং ধনং সর্ব্ববীরং সর্ব্ব- বীরমিতি ব্যত্যয়েন জসো হম্ সর্ব্বেষাং বীরাণাং শৌর্য্যাদিযুক্তানাং যৎ প্রার্থনীয়ং তদপি প্রযচ্ছত ইত্যাশংসা বাক্যার্থঃ। পূর্ব্বিণেভিরিতি পূর্ব্বশব্দাদ্বহুলং ঔণাদিক ইন প্রত্যয়ঃ ছান্দসত্বাৎ অকারলোপে ন সন্ধিঃ। লক্ষণাস্থিরোধান্ন বৃদ্ধিঃ। ছন্দসাং ভিস্ ঐসাদেশবাধাদেত্বং গম্ভীরেভিরিতি বহুলং ছন্দসীতি ঐসুন ভবতি (১০) অবনেজনে

পিণ্ডান্নিনয়েদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ অক্ষন্নমীমদন্ত হ্যব প্রিয়া অধূষত অস্তোষত স্বভানবো বিপ্রান্ বিষ্ঠয়া মতীয়ো যান্বিন্দ্রতে হরী। অস্যার্থঃ। হে হরে হে ইন্দ্র যান্ বিপ্রান্ যে শ্রাদ্ধভোক্তারো বিপ্রা মদ্দত্তেনান্নপানীয়েনামীমদন্ত মুদমত্যর্থং প্রাপ্য হর্ষযুক্তা বভূবুস্তথা অস্তোষত যে তুষ্টা ভূতাস্তথা অক্ষন্ যে সংহতা একীভূতাস্তান্ বিপ্রান্ অব পালয়। হি যস্মাৎ তে তব প্রিয়া বল্লভাঃ ব্রাহ্মণো মামকী তনুরিত্যুক্তত্বাৎ তত্র তে বিপ্রাস্তবৈব আশ্রয়ান্নাধূষত নাবকম্পন্ত কিন্তু তাস্তে বিপ্রাঃ স্বভানবঃ স্বপ্রকাশশীলাঃ স্বপ্রদীপকা ইতি যাবৎ। উ অবধারণে হ বিতর্কে। বিপ্রাঃ পুনঃ কীদৃশা বিষ্ঠয়া মতীয়া ঊর্দ্ধগামিন্যা মত্যা বিশিষ্টা বিষ্ঠেতি বি শব্দো হস্তরীক্ষেহপি

পঠিত্বা। ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেষ তে পিণ্ডঃ স্বধা ইত্যবনেজনস্থানে বামহস্তান্বারব্ধদক্ষিণহস্তেন দদ্যাৎ। ততঃ পিণ্ডশেষঞ্চ পিণ্ডান্তিকে দত্ত্বা অমন্ত্রকং করং নিঘৃষ্যাচম্য হরিং স্মৃত্বা পিণ্ডপাত্রপ্রক্ষালনজলেন ওঁ অমুক গোত্র পিতর ৩২০
মুক দেবশর্ম্মন্নেতত্তে হবনেনিক্ষ্ব স্বধোত্যানেন পিণ্ডমবনেজয়েৎ। ততঃ ওঁ অত্র পিতর্মাদয়স্ব যথাভাগমাবৃষায়স্ব (১১) ইতি জপেৎ।

বৌ তিষ্ঠতি গচ্ছতি বা বিষ্ঠা ছান্দসত্বাৎ ষত্বম্। অতস্তর্কয়ামি সুপ্রকাশবত ইতি ছান্দসত্বাৎ। মত্যা ইত্যর্থে মতীয়া যকারাগামঃ ছান্দসত্বাৎ। হরীতি সম্বোধনপদং সমুদ্ধাবীদিতি ঈকারঃ। ইন্দ্র ইতি হরিবিশেষণং পরমেশ্বরত্বাৎ অবিদ্যাং কার্য্যো হরতীতি হরিরিতি অন্বয়াৎ। যানিতি বিভক্তিব্যত্যয়েন প্রথমায়াং দ্বিতীয়া পূর্ব্ববৎ তেনায়মর্থঃ। যে বিপ্রা অত্র কর্ম্মণি ভোক্তারস্তান্ বিপ্রান্ অব ইত্যর্থঃ। অক্ষন্নিতি ছান্দসত্বাদড়াগমবাধঃ। মতীয়া উ যান্ ইত্যর্থে মতীয়ো যান্বিন্দ্র ইতি ব্যুৎপত্তিঃ। যত্তদোরভিসম্বন্ধনিয়মাৎ যচ্ছব্দপ্রয়োগে তানিত্যধ্যাহার্য্যম্। (১১) পিণ্ডদানানন্তরং অত্র পিতর ইতি জপেদিতি কাত্যায়নঃ। মন্ত্রস্তু। অত্র পিতরো মাদয়ধ্বং অপ ইতি

স্মাত্তা যথা[illegible]ষ্ম্। অস্যার্থঃ। হে পিতরঃ অত্র পিণ্ডে মাদয়ধ্বং হর্ষযুক্তা ভবত। ন কেবলং মাদয়ধ্বং কিন্তু যথাভাগং স্বং স্বং ভাগং শ্রাদ্ধোপযুক্তং প্রাপ্য আবৃষায়ধ্বং বৃষা ইব বলিনো ভবত। অত্রৈবামীমদন্তঃ পিতরো যথাভাগমাবৃষায়িষত। পিতরোঽমীমদন্ত মোদং প্রাপ্তা মদ্দত্তেন পিণ্ডেন হর্ষযুক্তা ভূতা ইত্যযথেতি ব্যাখ্যাতম্। ইব বলিনো বৃষশব্দাৎ ক্যঙ্ লোট্। বসন্তায় নমস্তু পিণ্ডপূজানন্তরমিতি স্মার্ত্তাঃ। (১২) ততঃ পরাবৃত্য নমো ব ইতি জপেদিতি কাত্যায়নঃ।

ততো বামাবর্ত্তেনোদঙ্মুখো ভূত্বা গ্লানিপর্য্যন্তং শ্বাসং ধৃত্বা পিতরং ভাস্বরমূর্ত্তিকং ধ্যায়ন্ দক্ষিণামুখো ভবন্ ওঁ অমীমদৎ পিতা যথাভাগমাবৃষায়িষ্ট ইতি জপেৎ। ততঃ শ্বাসং ত্যজেৎ। ততঃ ওঁ নমস্তে পিতঃ পিতর্নমস্তে ইতি কৃতাঞ্জলির্ব্বদেৎ। ওঁ গৃহান্নঃ পিতর্দেহীতি গৃহিণীং পশ্যেৎ। ওঁ সদস্তে পিতর্দেষ্ম (১২) ইতি পিণ্ডং পশ্যেৎ। ততো নবমনস্থা শুক্লবস্ত্রদশাভবং সূত্রং বিণ্ডাকুশসহিতং বামহস্তাদ্দক্ষিণহস্তেন গৃহীত্বা ওঁ এতদ্বঃ পিতরো বাস ইতি পঠিত্বা ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতত্তে বাসঃ স্বধা ইতি পিণ্ডে দদ্যাৎ। ওঁ ঊর্জ্জং বহন্তীরমৃতং ঘৃতং পয়ঃ কীলালং পরিস্রুতং স্বধা স্থ তর্পয়ত মে পিতরম্ [ ১৩ ]। ততস্ত্রক্তীং ৩২১

মন্ত্রস্তু। ওঁ নমো বঃ পিতরঃ পিতরো নমো বঃ ওঁ গৃহান্নঃ পিতরো দত্ত। ওঁ সদো বঃ পিতরো দেষ্মঃ। অস্যার্থঃ। হে পিতরঃ বো যুষ্মভ্যং নমো হস্তু ভক্তিশ্রদ্ধাতি-শয়েন পুনঃ পুনর্নমস্কারো হস্ত্বিতি পুনরুক্তিঃ। নমস্কারাদিনা প্রীতাঃ সন্তঃ পিতরো নো হস্মভ্যং গৃহানস্মৎকুলদারান্ অত্র চ গৃহিণী গৃহমুচ্যতে ইতি গৃহিণীপ্রানন্। দত্ত প্রযচ্ছত। বয়ং বো যুষ্মভ্যং পুত্রাদ্যুৎপত্তিরূপেণ সদঃ সত্তাস্থানং দেষ্মঃ দদামঃ ছান্দসত্বাৎ নিশেষ্বিকরণলোপঃ দীর্ঘাভাবো গুণশ্চোপধায়াঃ। (১৩) তত ঊর্জ্জমিত্যপো নিষিঞ্চেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ ঊর্জ্জং বহন্তীরমৃতং ঘৃতং পয়ঃ কীলালং পরিস্রুতং স্বধা স্থ তর্পয়ত মে পিতৃন্। অস্যার্থঃ। হে আপো জগৎপ্রাণভূতা যূয়ং স্বধা স্থ

নানাবিধমন্নং ভবত ভবদ্ভিরনেন পিতৄন্ তর্পয়তেত্যর্থঃ। ইতি প্রার্থনা। কিং কুর্ব্বতা ঊর্জ্জং পরমান্নরসমমৃতং ঘৃতং সর্পিঃ পয়ঃ ক্ষীরং কীলালং পক্কমন্নং পরিস্রুতং সুরাং তচ্ছায়ত্তরূপমেব বহন্তীঃ বহন্ত্যঃ প্রাপয়ন্ত্যঃ। যতো যূয়ং নানাবিধমন্নং বহন্ত্যঃ স্বধা ভবত তস্মান্মম পিতৄন্ তর্পয়ত বহন্তীরিতি বিভক্তিব্যত্যয়ঃ। (১৪) তদনন্তরং সব্যেন পরাবৃত্য বসন্তায় ইতি জপেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ বসন্তায় নমস্তুভ্যং গ্রীষ্মায় চ নমো নমঃ। বর্ষাভ্যশ্চ শরৎসংজ্ঞ ঋতবে চ নমঃ সদা। হেমন্তায় নমস্তুভ্যং নমস্তে শিশিরায় চ। মাসসংবৎসরেভ্যশ্চ দিবসেভ্যো নমো নমঃ। অস্যার্থঃ। বসন্তো জগদাহ্লাদক ঋতুবিশেষঃ। তৎ প্রত্যক্ষীকৃত্য স্তৌতি তুভ্যং নমঃ। তথা গ্রীষ্মঃ শোষক এব ঋতুস্তস্মৈ নমঃ। তথা বর্ষাঃ সর্ব্বজনানাং শস্যোৎপাদকত্বেন স্থিতিকারক ঋতু বিশেষস্তাভ্যো নমঃ। তথা শরদপি মনোহারী ঋতুস্তস্মৈ নমঃ। তথা হেমন্তঃ শৈত্যসমৃদ্ধিহেতুভূতসুখাবহ ঋতুস্তস্মৈ নমঃ। তথা শিশিরোঽপি মনো ঽনুকূলসুখসম্পাদক ঋতুস্তস্মৈ নমঃ। তথা দ্বাদশমাসাঃ সম্বৎসরাদিবর্ষাশ্চ স্বীয় স্বীয় প্রয়োজনকত্বেন

## গন্ধাদিনা পিণ্ডং পূজয়েৎ। ততঃ কৃতাঞ্জলিঃ। ওঁ বসন্তায় নমস্তুভ্যং গ্রীষ্মায় চ নমো নমঃ। বর্ষাভ্যশ্চ শরৎসংজ্ঞ ঋতবেচ নমঃ সদা। হেমন্তায় নমস্তুভ্যঃ নমস্তে শিশিরায় চ। মাসসম্বৎসরেভ্যশ্চ দিবসেভ্যো নমো নমঃ [১৪]। ইতি জপেৎ। তত ওঁ



নমস্যাস্তেভ্যো নম ইতি শ্রাদ্ধকর্ত্তুঃ পিতৄণাং ঋতুবিহিত শ্রাদ্ধদানেনাতিশয় প্রীতিজনকত্বাৎ ঋতুভ্যো নমস্কারদ্বারেণানতিরিত্যর্থঃ। যজুর্ব্বেদীনামপি ষড়ঞ্জলিদানং প্রসঙ্গাৎ লিখিতম্। ওঁ নমো বঃ পিতরঃ শুষ্মায় নমো বঃ পিতরস্তপসে নমো বঃ পিতরো যজ্জীবং তস্মৈ নমো বঃ পিতরো রসায় নমো বঃ পিতরো ঘোরায় মন্যবে ওঁ স্বধায়ৈ পিতরো নমঃ। এষা মন্ত্রার্থঃ। হে পিতরো বো যুষ্মভ্যং নমঃ শুষ্মায় চ নমঃ শুষ শোষণে ইতি শুষের্ম ইতি মপ্রত্যয়ঃ। শুষ্মায় শোষণকারিণে গ্রীষ্মায় ইত্যর্থঃ। তথা হে পিতরো বো যুষ্মভ্যং নমঃ তপসে শিশিরায় ঋতবে চ। তপ ইতি মাঘমাসস্য নাম। তপামাঘে ঽথ ফাল্গুনে ইত্যমরঃ। তপধূপ সন্তাপে শিশিরেণ লোকাংস্তাপয়তি তাপয়তে রসুন ছান্দসত্বাৎ হ্রস্ব ইলোপশ্চ। হে পিতরো বো যুষ্মভ্যং নমঃ যজ্জীবং জলঃ তস্মৈ নমঃ। জীবনত্বেন জলমুচ্যতে জলেন বর্ষাঃ সংবুধ্যন্তে অতো বর্ষাভ্যো নমঃ। তথা হে পিতরো বো নমঃ রসায় নমঃ। রসঃ পুষ্পরসঃ বসন্তায় নমঃ ওঁ তদ্যোগাত্তদ্বত্যতিদেশ ইতি রসশব্দেন বসন্ত উচ্যতে। তথা হে পিতরো বো নমঃ ঘোরায় মন্যবে নমঃ হেমন্তায় নম ইত্যর্থঃ। হেমন্তঃ খলু শীতলপ্রকৃতত্বাৎ প্রাণিনাং ভয়হেতুর্ভবতি অতো ঘোরঃ। মন্যুশ্চ দুঃখজনকত্বাৎ মন্যবে ক্রুদ্ধায় যথা কশ্চিৎ দুঃখং মনোদুঃখং জনয়তি তথা অয়মপি শীতলজনক

স্বাৎ দুঃখমুৎপাদয়তি। তথা হে পিতরো নমঃ স্বধায়ৈ শরদে নমঃ তথা চ শ্রুতিঃ। স্বধা বৈ শরৎ স্বধা বৈ পিতৃণামন্নমিতি তদেতৈঃ ষড়্ভিঃ ঋতুনমস্কারৈঃ পিতরঃ তৃপ্তা ভবন্তি ঋতবশ্চেতি তাৎপর্য্যম্। (১৫) অথ পিণ্ডাগ্রভূমিমাসিঞ্চেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ সুসংপ্রোক্ষিতমস্তু। অস্যার্থঃ। ইদং পিণ্ডমিমং পন্থানং সুসংপ্রোক্ষিতং অতিশয়েন প্রোক্ষিতং ভবতু ইত্যাশংসা। (১৬) তথা শিবা আপঃ সন্তু। অস্যার্থঃ। এতা আপঃ শ্রাদ্ধকর্ম্মণি নিযুক্তাঃ শিবাঃ কল্যাণপ্রদাঃ সন্তু ইত্যাশংসা। (১৭) তথা সৌমনস্যম্।

॥ * ॥ একোদ্দিষ্টশ্রাদ্ধম্ ॥ * ॥

সুসংপ্রোক্ষিতমস্তু [১৫]। ইতি ব্রাহ্মণাগ্রভূমিমাসিঞ্চেৎ। ওঁ অস্ত্বিতি প্রতিবচনম্। ততঃ ব্রাহ্মণহস্তে ওঁ শিবা আপঃ সন্তু [১৬]। ইতি জলং দদ্যাৎ। ওঁ সন্ত্বিতি প্রতিবচনম্। ওঁ সৌমনস্যমস্ত্বিতি [১৭]। পুষ্পং দদ্যাৎ। ওঁ অস্ত্বিতি প্রতিবচনম্। ওঁ অক্ষতঞ্চারিষ্টমস্তু [১৮]। ইতি দূর্ব্বাক্ষতং দদ্যাৎ। ওঁ অস্ত্বিতি প্রতিবচনম্। ততস্তিলাজ্যমধুযুক্তং জলং গৃহীত্বা ওঁ অমুক গোত্রস্য পিতুরমুক দেব-শর্ম্মণঃ কৃতেঽস্মিন্ শ্রাদ্ধে দত্তমিদমন্নপানাদিকমুপতিষ্ঠতামিত্যনেন ব্রাহ্মণহস্তে পিণ্ডে চ দদ্যাৎ। ওঁ উপতিষ্ঠতামিতি প্রতি-বচনম্। ওঁ অঘোরঃ পিতাস্তু [১৯]। ইতি বদেৎ। ওঁ অস্ত্বিতি প্রতিবচনম্। ওঁ গোত্রং নো বর্দ্ধতামিতি [২০] বদেৎ। ওঁ বর্দ্ধতা- ৩২৩

অস্যার্থঃ। সুমনসো ভাবঃ সৌমনস্যং যদত্র শ্রাদ্ধে দত্তং পুষ্পং সৌমনস্যং সুমনসঃ প্রসাদজনকং ভবতু। (১৮) তথা অক্ষতঞ্চারিষ্টমস্তু। অস্যার্থঃ। অক্ষতং যব ইদমক্ষতমরি-ষ্টং শ্রাদ্ধবিঘ্নকারিণং নিরাশয়তুমস্তু ভবতু। (১৯)ততো হক্ষয্যাদানানন্তরম্। অঘোরা ইতি জপেদিতি কাত্যায়নঃ। মন্ত্রো যথা। অঘোরাঃ পিতরঃ সন্তু। অস্যার্থঃ। মম পিতরঃ পিতৃপিতামহ প্রপিতামহ প্রভৃতয়ঃ অঘোরা অভয়প্রদাঃ সন্তু ভবন্তু। (২০) গোত্রং নো বর্দ্ধতাম্। তেষাং শ্রাদ্ধদানেনাতিশয়প্রীতিজনকত্বাৎ স্বগোত্রং সন্ততিং পুত্রপৌত্রাদি-

রূপাং বর্দ্ধতামিত্যাশংসা। (২১) ততঃ প্রদক্ষিণীকৃত্য প্রণমেৎ ইতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ আ মা বাজস্য প্রসবো জগম্যা দেমে দ্যাবাপৃথিবী বিশ্বরূপে আ মা গন্তং। পিতরা মাতরা যুবমা মা সোমে হমৃতত্বায় গম্যাদিতি। অস্যার্থঃ। বাজস্য শ্রাদ্ধদত্তান্নস্য প্রসবঃ ফলং মা মাং আ জগম্যাৎ পুনঃ পুনরাগচ্ছতু। ইমে দ্যাবাপৃথিবী

মিত্যুত্তরম্। ততঃ সপবিত্রকুশান্ পিণ্ডোপরি দত্ত্বা ওঁ উর্জ্জং বহন্তীরমৃতং ঘৃতং পয়ঃ কীলালং পরিশ্রুতং স্বধা স্থ তর্পয়ত মে পিতরম্। ইতি পিণ্ডং সিঞ্চেৎ। ততো দক্ষিণাং কুর্য্যাৎ। ততঃ ওঁ অদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণঃ কৃতৈতদেকোদ্দিষ্টবিধিক সাম্বৎসরিক শ্রাদ্ধকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং রজতং তন্মূল্যং বা বিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানি। ততঃ কৃতাঞ্জলিঃ। সুমনাস্তন্মনা ভূত্বা দক্ষিণাং দিশং পশ্যন্ পিতরং যাচেত। ওঁ দাতারো নো হভিবর্দ্ধন্তাং বেদাঃ সন্ততিরেব চ। শ্রদ্ধা চ নো মা ব্যগমদ্বহু দেয়ঞ্চ নো হস্ত্বিতি। অন্নঞ্চ নো বহু ভবেদতিথীংশ্চ লভেমহি। যাচিতারশ্চ নঃ সন্তু মা চ যাচিস্ম কঞ্চন। অন্নং প্রবর্দ্ধতাং নিত্যং দাতা শতং জীবতু। যস্মৈ সংকল্পিতো দ্বিজস্তস্যাজ্ঞয়া তৃপ্তিরস্তু। এতাঃ সত্যাশিষঃ সন্তু। ওঁ সন্ত্বিতি প্রতিবচনম্। পিতৃবর প্রসাদো হস্তু। ওঁ অস্ত্বিতি প্রতিবচনম্ ততঃ ওঁ দেবতাভ্যঃ পিতৃভ্যশ্চ মহাযোগিভ্য এব চ। নমঃ স্বধায়ৈ স্বাহায়ৈ নিত্যমেব ভবন্ত্বিতি। ইতি ত্রিঃ পঠেৎ। ততঃ ওঁ অভিরম্যতাং ইতি বিসর্জ্জনম্। ওঁ অভিরতাঃস্মীতি উত্তরম্। ততঃ ওঁ আ মা বাজস্য প্রসবো জগম্যাদেমে দ্যাবাপৃথিবী বিশ্বরূপে আ মা গন্তং পিতরা মাতর যুবমা মা সোমা হমৃতত্বায় গম্যাৎ [২১]। ইতি মন্ত্রেণ প্রদক্ষিণবারিধারয়া ব্রাহ্মণং বেষ্টয়ন্ পিতরং প্রণমেৎ। ততঃ ৩২৪

মা মাং জগম্যেতাং পুনঃ পুনরাগচ্ছতাং কিম্ভূতে দ্যাবাপৃথিবী বিশ্বরূপে বিশ্বং জগৎ তদেব রূপং যয়োস্তে বিশ্বরূপে এতেন দ্যাবাপৃথিবীসম্বন্ধি যৎ কল্যাণফলং তৎ মা মা গচ্ছত্বিত্যাশংসা। কিঞ্চ হে সে মম পিতরামাতরা পিতরৌ যুবং যুবাং মা মাং আগন্তং আগচ্ছতং যদা যদা শ্রাদ্ধং করোমি তদা তদা মম মাতাপিতরা-

বাগিন্দ্রতামিত্যর্থঃ। যুবামিতি প্রথমাদ্বিবচনে ভাষায়ামিতি সূত্রে ভাষাগ্রহণাচ্ছন্দসি আকারো ন ভবতি। আগন্তুমিতি ছান্দসত্বাদাগমঃ ন শপ্‌লোপঃ ছকারলোপশ্চ নিরুক্তলক্ষণাৎ। কিঞ্চ পিতৄণাং সোমো রাজা মা মাং আগম্যাৎ আগচ্ছতু কিমর্থং অমৃতত্বায় মোক্ষায় তদেবং শ্রাদ্ধং কৃত্বা বিসর্জ্জিতেষু বিপ্রেষু অনুব্রজনে ক্রিয়মাণে



পিণ্ডন্তু গো হজবিপ্রেভ্যো দদ্যাৎ। জলে বা ক্ষিপেৎ। শ্রাদ্ধীয় দ্রব্যং ব্রাহ্মণায় দদ্যাৎ জলে বা ক্ষিপেৎ। ততো বামদেব্যং গীত্বা অশক্তৌ ঋক্ চতুষ্টয়ং ত্রিধা পঠেৎ। ততো দক্ষিণপাণিনা দীপং প্রচ্ছাদ্য হস্তৌ প্রক্ষাল্যাচম্য কৃতৈতৎ কর্ম্মাচ্ছিদ্রমস্তু ইতি পৃচ্ছেৎ। ওঁ অচ্ছিদ্রমস্ত্বিতরম্। ততঃ ওঁ অদ্যেত্যাদি কৃতৈতৎ একোদ্দিষ্ট শ্রাদ্ধকর্ম্মণি যদ্বৈগুণ্যং জাতং তদ্দোষপ্রশমনায় বিষ্ণুস্মরণমহং 
করিষ্যে। ইতি সঙ্কল্প্য ওঁ তদ্বিষ্ণোরিত্যনেন বিষ্ণুং স্মরেৎ ইতি॥ * ॥ * ॥ * ॥

শ্রাদ্ধফলং পার্থিবসুখং স্বর্গসুখঞ্চ মম ভবতু মোক্ষশ্চ ভবত্বিত্যর্থঃ। প্রজানিঃশ্রেয়সার্থমিত্যাপস্তম্বেন শ্রাদ্ধস্য মোক্ষফলত্বাভিধানাৎ। দ্যাবাপৃথিবী ইতি দ্যৌশ্চ পৃথিবী চ ছান্দসত্বাৎ ন দ্বিবচনম্। আজগম্যাদিতি গমের্ষত্বাৎ লিঙ্ ছান্দসত্বান্নুস্বারাগমঃ। আগন্তুং ব্যবহিতেনাঙাসম্বন্ধঃ। মাতরাপিতরাবিত্যর্থে নিপাতনাদাত্বম॥ * ॥

অথাশৌচান্ত দ্বিতীয়দিনশ্রাদ্ধপ্রয়োগঃ ॥ * ॥ তত্র পূর্ব্বদিনে কৃতক্ষৌরোদ্বর্ত্তনং স্নানাদিঃ পরদিনে সূর্য্যোদয়ানন্তরং সরি-
রস্ক স্নানং কৃত্বা দ্বিরাচম্য দক্ষিণহস্তেন জলং স্পৃষ্ট্বা গায়ত্রীং স্মৃত্বা বৈধস্নানং কুর্য্যাৎ। তত্রাসামর্থ্যে বা ত্রিসন্ধ্যোত্তর কালে বা। ততঃ
সন্ধ্যাদি দেবপূজাং বিধায় দক্ষিণাভিমুখীভূয় কৃতপাদশৌচো দর্ভহস্তঃ প্রাঙ্মুখ উদঙ্মুখো বা দ্বিরাচম্য গোময়োপলিপ্তায়াং ভূমৌ
সদর্ভাসনে চোপবিশ্য তিলতৈলেন দীপং প্রজ্বাল্য ওঁ বাস্তুপুরুষায় নমঃ ইতি বাস্তুং সংপূজ্য ওঁ তদ্বিষ্ণোঃ পরমমিত্যাদিনা বিষ্ণুং
সংস্মৃত্য ওঁ তৎসদিত্যুচ্চার্য্য যজ্ঞেশ্বরং সংপূজ্য শ্রাদ্ধীয়াগ্রং দত্ত্বা পরকীয় ভূমৌ চেৎ স্বামিনে মূল্যমথবাপিতৃনীত্বা ওঁ ইদমন্ন-
মেতদ্ভূস্বামি পিতৃভ্যঃ স্বধা ইত্যগ্রভাগং দদ্যাৎ। ততো দক্ষিণামুখঃ প্রাচীনাবীতী পাতিতবামজানুঃ তিলপ্রোক্ষিত দক্ষিণাগ্রৈক
দর্ভযুক্তাসনে দর্ভবটুং সংস্থাপ্য ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তে দর্ভাসনং স্বধা। ওঁ অত্রাসনে দেবরাজভানুজাতো
বিশ্রম্যতাং দ্বিজবর্য্যানুগ্রহায় চ। প্রসাদয়েত্ত্বামন্নং গৃহ্ণ পূতং জ্ঞানাগ্নিশুদ্ধেন করেণ বিপ্র ইতি মন্ত্রং পঠেৎ। ওঁ অমুক গোত্র
প্রেতামুক দেবশর্ম্মন্নেতত্তে ছত্রং স্বধা। ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তে উপানহযুগলং স্বধা। তদশক্তৌ তৎপ্রতি-
নিধিত্বেন কাষ্ঠপাদুকাযুগলং দদ্যাৎ। ততঃ ওঁ অদ্যামুকে মাস্যমুকে পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য প্রেতস্য অমুক দেবশর্ম্মণো
ঽশৌচান্তা দ্বিতীয়ে ঽহ্নি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ আদ্যৈকোদ্দিষ্ট শ্রাদ্ধং দর্ভময় ব্রাহ্মণে ঽহং করিষ্যে। ওঁ কুরু-
ষ্বেত্যুত্তরম্। ততো গায়ত্রীং জপেৎ ওঁ দেবতাভ্য ইতি ত্রিধা পঠেৎ। ততঃ পুণ্ডরীকাক্ষং স্মৃত্বা যুক্তজলেন শ্রাদ্ধীয় দ্রব্যং প্রোক্ষ-
য়েৎ রক্ষার্থমুদকপূর্ণপাত্রমেকদেশে স্থাপয়েৎ। ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তে দর্ভাসনং স্বধা। ইত্যনেন ব্রাহ্মণ

বামপার্শ্বে মোটকং দদ্যাৎ। ততঃ ওঁ অপহতেত্যাদিনা তিলান্ বিকীর্য্য জলং স্পৃষ্ট্বা ব্রাহ্মণাগ্রভূমৌ কুশপত্রমেকং পাতয়িত্বা
তদুপরি পাত্রং সংস্থাপ্য ওঁ পবিত্রোসি বৈষ্ণবীত্যনেনানখচ্ছিন্নং ওঁ বিষ্ণোর্মনসা পূতমসীত্যনেন প্রোক্ষিতমেকদলং পবিত্রং তৎ
পাত্রেনিধায় ওঁ শন্নোদেবীরিত্যাদি মন্ত্রেণ জলং দদ্যাৎ। তত ওঁ তিলোসি সোমদেবত্যো গোসবো দেবনির্ম্মিতঃ প্রত্নমদ্ভিঃ
পৃক্তঃ স্বধয়া প্রেতান্ লোকান্ প্রীণাহি নঃ স্বাহা। ইত্যনেন তিলান্ দত্ত্বা ব্রাহ্মণে পবিত্রং দত্ত্বা জলান্তরঞ্চ দত্ত্বা পুষ্পান্তরেণ
ওঁ শিরঃ প্রভৃতি সর্ব্বগাত্রেভ্যো নমঃ ইতি সংপূজ্য ততঃ পাত্রং বামহস্ততলে বিন্যস্য দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা
ইতি পঠিত্বা ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তেঽর্ঘ্যং স্বধা। তত ওঁ ইহলোকং পরিত্যজ্য গতো হসি পরমাং গতি-
মিত্যাবাহয়েৎ ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতানি তে গন্ধপুষ্প ধূপদীপাচ্ছাদনানি স্বধা ইত্যুৎসৃজ্য ওঁ সর্ব্বঃ সুগন্ধ দ্যোয়ং
শীতলঃ সুমনোহরঃ ময়া নিবেদিতো ভক্ত্যা গন্ধোঽয়ং প্রতিগৃহ্যতাং। ইতি মন্ত্রং পঠিত্বা এষ তে গন্ধ ইতি গন্ধং ওঁ শ্রিয়া
দেব্যা সমাযুক্তং দেবৈরপি শিরো ধৃতং। ময়া নিবেদিতং ভক্ত্যা পুষ্পমেৎ প্রগৃহ্যতাম্। ইতি পঠিত্বা এতত্তে পুষ্পং ইতি পুষ্পং।
ওঁ বনস্পতিরসো দিব্যঃ শীতলঃ সুমনোহরঃ। ময়া নিবেদিতো ভক্ত্যা ধূপোঽয়ং প্রতিগৃহ্যতাং। ইতি মন্ত্রং পঠিত্বা এষ তে ধূপ
ইতি ধূপং। ওঁ সুপ্রকাশো মহাদীপঃ সর্ব্বতস্তিমিরাপহঃ। সবাহ্যাভ্যন্তরং জ্যোতির্দীপোঽয়ং প্রতিগৃহ্যতাং। ইতি পঠিত্বা
এষ তে দীপঃ ইতি দীপমুপনয়েৎ ওঁ এতত্ত আচ্ছাদনমিতি প্রত্যেকং নিবেদয়েৎ। ততঃ শয্যাং প্রেতোপভোগ্য যানালঙ্কার-
বস্ত্রাদি চ দদ্যাৎ। ততো ব্রাহ্মণাগ্রভূমৌ কুশাদিকমপনীয় নৈর্ঋতীমারভ্য দক্ষিণাগ্রান্তয়া রেখয়া বামাবর্ত্তেন জলেন চতুষ্কোণ

মণ্ডলং কৃত্বা তত্র ভোজনপাত্রং নিদধ্যাৎ। তত্র সামিষং সর্ব্বমন্নাদিকং পরিবেশ্য ওঁ ইদং বিষ্ণুরিত্যাদি মন্ত্রেণ ওঁ ইদমন্নমিত্যা-
দ্যুক্ত্বা অন্নাদাবনখমঙ্গুষ্ঠং নিক্ষিপ্য ওঁ অপহতেত্যাদিনা তিলান্ বিকীর্য্য ব্রাহ্মণে জলগণ্ডূষং দত্ত্বা গায়ত্রীং জপ্ত্বা অন্নে মধু দত্ত্বা
তদভাবে গুড়ং দত্ত্বা সপ্রণবব্যাহৃতিকাং গায়ত্রীং ওঁ মধুবাতা ইত্যাদি ওঁ মধু মধু মধ্বিতি চ পঠিত্বান্নমভিমন্ত্র্য প্রোক্ষ্য ব্রাহ্মণে
জলগণ্ডূষং দত্ত্বা বামহস্তেনান্নপাত্রং ধৃত্বা ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তে হন্নং সোপকরণং স্বধা ইত্যুৎসৃজেৎ।
ততো যথাসুখং বাগ্যতঃ স্বদ ইত্যনেন জলগণ্ডূষং দদ্যাৎ। ততো গায়ত্রীং ত্রিঃ সকৃদ্বা ওঁ মধুবাতা ইত্যাদি ওঁ মধু মধু মধ্বিতি চ
ওঁ অন্নহীনমিত্যাদি চ পঠেৎ। ততঃ শ্রব্যং পঠেৎ। তদ্যথা গায়ত্রীং মধুবাতেত্যাদিতৃচং ওঁ মধু মধু মধ্বিতি চ ওঁ যজ্ঞেশ্বর
ইত্যাদি ওঁ যোগীশ্বরমিত্যাদি যাজ্ঞবল্ক্যশ্লোকত্রয়ং ওঁ তদ্বিষ্ণোরিত্যাদি ওঁ দুর্য্যোধন ইত্যাদি ওঁ যুধিষ্ঠির ইত্যাদি সর্ব্বং পঠেৎ। 
ততো দক্ষিণাগ্রান্ কুশান্ ভূমৌ সংস্থাপ্য ভূমিং প্রোক্ষ্য সর্ব্ব প্রকারমন্নমুদ্ধৃত্য সতিলমেকীকৃত্য বারিণাপ্লুত্য ওঁ অগ্নিদগ্ধাশ্চে-
ত্যাদি মন্ত্রদ্বয়েন কুশোপরি বিকীরেৎ। ততো হস্তৌ প্রক্ষাল্যাচম্য দক্ষিণকর্ণং স্পৃষ্ট্বা বা হরিং স্মৃত্বা ব্রাহ্মণায় জলগণ্ডূষং
দত্ত্বা পূর্ব্ববদ্গায়ত্রীং মধুবাতেত্যাদিকং ওঁ মধু মধু মধ্বিতি চ জপ্ত্বা শেষমন্নং কিং দেয়মিতি পৃচ্ছেৎ ওঁ ইষ্টায় দীয়তামিতি
প্রত্যুক্তে ওঁ পিণ্ডদানমহং করিষ্যে ইতি পৃচ্ছেৎ ওঁ কুরুষ্বেত্যুক্তে ব্রাহ্মণসংমুখে ওঁ নিহন্মীত্যাদিনা নৈর্ঋতীমারভ্য দক্ষিণাগ্র-
রেখয়া জলেন বামাবর্ত্তেন চতুষ্কোণ মণ্ডলং কৃত্বা পবিত্রং বামহস্তাদ্দক্ষিণ হস্তেন গৃহীত্বা বামহস্তোত্তারব্ধ দক্ষিণপাণিনা
দক্ষিণাগ্রাং রেখাং মধ্যস্থানে ওঁ অপহতেত্যাদি ওঁ নিহন্মীত্যাদি মন্ত্রাভ্যাং কুর্য্যাৎ তদর্দ্ধদ্বয়মুত্তরস্যাং দিশি ক্ষিপেৎ রেখোপরি

সমূলান্ সাগ্রান্ কুশানাস্তীর্য্য ওঁ দেবতাভ্য ইতি পঠিত্বা ওঁ এহি প্রেত সৌম্য গম্ভীরেভিঃ পথিভিঃ পূর্ব্বিণেভির্দেহ্যস্মভ্যং দ্রবিণেহ ভদ্রং রৈশ্চ নঃ সর্ব্ববীরং নিযচ্ছেত্যাবাহ্য তিলাংশ্চাস্তীর্ণ কুশেষু বিকীরেৎ। ততো বামহস্তেন সতিল জলং গৃহীত্বা বামহস্তাদ্দক্ষিণহস্তেন সংগৃহ্য ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নবনেনিক্ষ্ব স্বধেত্যনেন দদ্যাৎ। ততঃ শ্রাদ্ধশেষমন্নং সব্যঞ্জনং মধ্বাজ্যতিলসংযুক্তং গৃহীত্বা পিণ্ডং কৃত্বা ওঁ মধুবাতেত্যাদি ত্রয়ং ওঁ অক্ষন্নমীমদন্ত ইত্যাদি পঠিত্বা বিল্বপ্রমাণং পিণ্ডং সতিলং দ্বিগুণ ভুগ্ন কুশত্রয় সহিতং বামহস্তস্থিত পাত্রাদ্দক্ষিণহস্তেন গৃহীত্বা ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেষ তে পিণ্ডঃ স্বধা ইত্যবনে-জন স্থানে দদ্যাৎ। ততঃ আচম্য হরিং স্মৃত্বা পিণ্ডপাত্রং প্রক্ষাল্য বামহস্তাদ্দক্ষিণ হস্তেন গৃহীত্বা প্রক্ষালিত জলেন ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নবনেনিক্ষ্ব স্বধেতি পিণ্ডোপরি দদ্যাৎ। ওঁ অত্র প্রেত মাদয়স্ব যথা ভাগমাবৃষায়স্বেতি জপ্ত্বা বামা- ৩২০

বর্ত্তেনোদঙ্মুখো ভূত্বা আগমনাচ্ছাসং ধৃত্বা তেনৈব পথা পরাবর্ত্তমানঃ প্রেতং ভাস্বরমূর্ত্তিং ধ্যায়ন্ ওঁ অমীমদৎ প্রেতো যথা ভাগমাবৃষায়িষ্ট ইতি দক্ষিণাভিমুখো ভবন্ জপেৎ ততঃ শ্বাসং ত্যজেৎ। ওঁ নমস্তে প্রেত প্রেত নমস্তে ইতি কৃতাঞ্জলি-র্জপেৎ। ওঁ গৃহান্নঃ প্রেত দেহি ইতি গৃহিণীং পশ্যেৎ। ওঁ সদস্তে প্রেত দেষ্ম ইতি পিণ্ডং পশ্যেৎ। ততো নবমনস্থা শুক্ল-বস্ত্র দশাভবং সূত্রং বামহস্তাদ্দক্ষিণহস্তেন গৃহীত্বা ওঁ এতদ্বঃ প্রেতাবাসঃ ইতি পঠিত্বা পিণ্ডোপরি নিদধ্যাৎ। ততঃ ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তে বাসঃ স্বধা ইত্যনেনোৎসৃজেৎ। ততস্তুষ্টীং পিণ্ডং সংপূজ্য ওঁ বসন্তায়েত্যাদি মন্ত্রেণ ষড়্ ঋতুনমস্কুর্য্যাৎ। ততঃ ওঁ সুপ্রোক্ষিতমস্ত ইতি ব্রাহ্মণায়াঞ্জলিং যাচিকেৎ। ওঁ অস্ত্বিতি প্রতিবচনম্। ওঁ শিবা আপঃ

বা পূর্ব্বতিথৌ দ্বিতীয় ষাণ্মাসিকং এবং মাসিকোল্লেখে প্রথম মাসিক দ্বিতীয় মাসিকাদ্যুল্লেখঃ এষাং মধ্যে যৎ পতিতং তৎ কৃষ্ণৈকাদশ্যাং মাসিকান্তর তিথৌ বা কৃত্বা প্রকৃতং কর্ত্তব্যং একাদশাহাদি শ্রাদ্ধানি কতিচিৎ কৃত্বা যদি মৃতস্তদা শেষাণ্যন্যেনা-ধিকারিণা সমাপ্যানি ॥ * ॥ * ॥ * ॥ * ॥ * ॥

অথ সপিণ্ডীকরণশ্রাদ্ধব্যবস্থাসংক্ষেপঃ ॥ * ॥ তত্র প্রথমং বিশ্বদেবানুষ্ঠানং ততঃ পিতামহাদিত্রয়পার্ব্বণানুষ্ঠানং ততঃ প্রেতৈকোদ্দিষ্টানুষ্ঠানং কর্ত্তব্যং। প্রেতপিত্রাদৌ জীবতি তৎপূর্ব্বপুরুষত্রয়েণ সহ সপিণ্ডনং স্ত্রিয়াস্তু পুত্রসত্ত্বে পত্যাদি পুরুষ-ত্রয়েণ পত্যৌ জীবতি শ্বশ্র্বাদিভিস্তিসৃভিঃ শ্বশ্রূমপি জীবন্ত্যাং তৎশ্বশ্র্বাদিভিস্তিসৃভিঃ সহেতি বিশেষঃ। শ্রাদ্ধশেষান্নস্য নষ্টত্বে দুষ্টত্বে বা অন্নান্তরেণ পিণ্ডাঃ দেয়াঃ। শেষ দ্রব্য নিয়মস্তু তৎসম্ভবে দ্রব্যান্তরত্যাগায় অন্যথা তদলাভাবে কর্ম্মবৈগুণ্যং স্যাৎ। পিণ্ডস্য প্রেতপিণ্ডেন সহ মিশ্রীকরণং যত্রেতিসমাখ্যাসিদ্ধ্যর্থং তথাচরণং যুক্তত্বাৎ। মাতুঃ সপিণ্ডীকরণেত্বয়ং বিশেষঃ। যদি পিতা জীবতি তদা পিতামহী প্রপিতামহী বৃদ্ধপ্রপিতামহীনাং পার্ব্বণবিধিনা সমন্ত্রকং শ্রাদ্ধং কর্ত্তব্যং। মাতুশ্চৈকো-দ্দিষ্টং সমন্ত্রকং যে সমানা ইতি মন্ত্রদ্বয়ং পঠন্ পিতামহীপাত্রে পিণ্ডে চ মাতৃপাত্রজলপিণ্ডৌ মিশ্রয়েৎ। তত্র পিতামহ্যা-দীনাং কুশাসনদানে যে চাত্রেতিমন্ত্রানূহেন প্রয়োগঃ। পত্যা ক্রিয়মাণে সপিণ্ডনেপ্যেবং। যদি মৃতঃ পিতা তদা পিত্রাদিত্রয়াণাং পার্ব্বণবিধিনাশ্রাদ্ধং কর্ত্তব্যং। মাতুরেকোদ্দিষ্টং তত্র পিতামহপ্রপিতামহয়োরর্ঘ্যপাত্রদ্বয়ং পিণ্ডদ্বয়ঞ্চ কুশৈরাচ্ছাদ্য পিত্রর্ঘ্যপাত্রে পিণ্ডে চ মাতুরর্ঘ্যং পিণ্ডঞ্চ মিশ্রয়েৎ। স্ত্রিয়াস্তু পতিপুত্রাসত্ত্বে সপিণ্ডনাভাবঃ পঞ্চদশভিঃ শ্রাদ্ধৈরেব প্রেতত্বনিবৃত্তিপূর্ব্বক পিতৃ- ৩৩১

সন্ত্বিতি ব্রাহ্মণে জলং দদ্যাৎ। সন্ত্বিতি প্রতিবচনং। ওঁ সৌমনস্যমস্ত্বিতি পুষ্পং ওঁ অস্ত্বিতি প্রতিবচনং। ওঁ অক্ষতঞ্চারিষ্টঞ্চাস্ত্ব ইতি যবান্ দদ্যাৎ। ওঁ অস্ত্বিত্যুত্তরম্। ততস্তিলাজ্য মধুসংযুক্তং জলং গৃহীত্বা ওঁ অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো দত্তমিদমন্নপানাদিকমুপতিষ্ঠতাং। ওঁ উপতিষ্ঠতামিতি প্রতিবচনং। ওঁ অঘোরঃ প্রেতো হস্ত্বিতি বদেৎ ওঁ অস্ত্বিত্যুত্তরম্। ওঁ গোত্রং নোবর্দ্ধতামিতি বদেৎ ওঁ বর্দ্ধতামিত্যুত্তরং। ততঃ পিণ্ডোপরি সপবিত্র কুশানাস্তীর্য্য ওঁ ঊর্জ্জং বহন্তীরমৃতং ঘৃতং পয়ঃ কীলালং পরিস্রুতং স্বধাস্থ তর্পয়ত মে প্রেতমিত্যনেন বারিধারয়া সিঞ্চেৎ। তত ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ কৃতৈতদাদ্যৈকোদ্দিষ্ট শ্রাদ্ধকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং রজতং তন্মূল্যং বা বিষ্ণুদৈবতং যথা নাম গোত্রায় ব্রাহ্মণায়াহং দদানীতি দদ্যাৎ। ততো দক্ষিণাং দিশং পশ্যন্ বরং যাচেত দাতৃপাত্রমালভ্যজপেন্নাত্রাশিষঃ প্রার্থয়েদিতি প্রচেতোবচনাচ্চ-নাত্রাশিষং প্রার্থয়েৎ। ওঁ দেবতাভ্য ইতি ত্রিঃ পঠেৎ। অভিরম্যতামিতি বিসর্জ্জনং ওঁ অভিরতোস্মীত্যুত্তরং। ওঁ আমা বেতি প্রদক্ষিণ বারিধারয়া বেষ্টয়েৎ পিণ্ডাংস্তু গো হজবিপ্রেভ্যো দদ্যাদগ্নৌ জলে বাক্ষিপেৎ শ্রাদ্ধীয় দ্রব্যং ব্রাহ্মণায় দাপয়েৎ জলে বা ক্ষিপেৎ। ততো বামদেব্যং গায়েত অচ্ছিদ্রাবধারণং দীপাচ্ছাদনং বিষ্ণুস্মরণঞ্চ কুর্য্যাৎ। ততো বৈশ্যদেব বলি কর্ম্মণী কুর্য্যাৎ। এবং পীঠ ছত্রোপানহ রহিতং ইহ লোকং পরিত্যজ্যেত্যাদি সর্ব্বঃ সুগন্ধ ইত্যাদি প্রিয়া দেব্যা ইত্যাদি বনস্পতিরস ইত্যাদি সুপ্রকাশ ইত্যাদি মন্ত্রপঞ্চক রহিতমাদ্যৈকোদ্দিষ্টবৎ মৃতাহনি দ্বাদশমাসিকানি একাদশমাসাভ্যন্তরে মলমাসপাতে ত্রয়োদশ মাসিকানি ষষ্ঠমাসাভ্যন্তরে মলমাসপাতেপি ষষ্ঠমাসিক পূর্ব্বতিথাবেব প্রথম ষাণ্মাসিকং তথা দ্বাদশ মাসিকস্য ত্রয়োদশ মাসিকস্য-

ত্বপ্রাপ্তিঃ। অপক্রষ্যসপিণ্ডনেকৃতে পূর্ণসম্বৎসরকালবদাবশ্যকবৃদ্ধিকালপ্রাপ্ত্যা পিতৃত্বপ্রাপ্তিঃ। ষোড়শশ্রাদ্ধানাং মধ্যে পরশ্রাদ্ধে
কৃতে পূর্ব্বশ্রাদ্ধানামকরণে পূর্ব্বশ্রাদ্ধমাত্রং করণীয়ং নতু তদাদিসর্ব্বং। পিতামহে জীবতি পিতুঃ সপিণ্ডনং প্রপিতামহাদিভি
স্ত্রিভিঃ সহ পিতৃমরণানন্তরং পিতামহে মৃতে পিতুঃ সপিণ্ডনং প্রেতীভূতেন পিতামহেন সহ কর্ত্তব্যং। তত্রাপি সপিণ্ডনশ্রাদ্ধং
দৈবপূর্ব্বং নিয়োজয়েদিতি শাতাতপবচনেন দৈবপূর্ব্বকত্বনিয়মাৎ প্রপিতামহ বৃদ্ধপ্রপিতামহপার্ব্বণায় প্রথমতো বৈশ্যদেবপক্ষঃ
ততঃ পিতামহাদিক্রমানুরোধাৎ একোদ্দিষ্টেন প্রেতপিতামহপক্ষঃ ততঃ পার্ব্বণবিধিনা প্রপিতামহবৃদ্ধপ্রপিতামহপক্ষঃ ততঃ
পিতুরেকোদ্দিষ্টমিতি বিশেষঃ। আচারস্ত্বেবং বস্তুতস্তু পাপিষ্ঠমপি শুদ্ধেন শুদ্ধিং পাপকৃতাপিবেতি বচনবলাৎ বৃদ্ধপ্রপিতামহাতি
বৃদ্ধপ্রপিতামহবৎ প্রেতীভূত পিতামহস্যাপি পার্ব্বণং কর্ত্তব্যং নত্বেকোদ্দিষ্টং। এবমসংস্কৃত প্রপিতামহস্যাপীতি এবং মাতু- ৩৩২
রপি প্রেতীভূতেন পিত্রাসহ সপিণ্ডনং। সপিণ্ডীকরণস্য তু পূর্ণসংবৎসর ইতি মুখ্যকল্পঃ। তদশক্তৌ নবমো মাসঃ। তত্রাপ্য-
শক্তৌ ষষ্ঠো মাসঃ। তদশক্তৌ ত্রিপক্ষঃ। তত্রাপ্যশক্তৌ প্রথমমাসস্যাশৌচাপগমে দ্বাদশভির্দ্দিনৈর্দ্বাদশমাসিকশ্রাদ্ধানি নির্ব্বর্ত্ত্য
ত্রয়োদশাহঃ। শূদ্রস্য তু দ্বাদশাহ এব যত্র তু একাদশমাসাভ্যন্তরে অধিমাসপাতস্তত্র ত্রয়োদশমাসিকানি কৃত্বা চতুর্দ্দশেহ্নি শূদ্রেণ
তু ত্রয়োদশেহ্নীতি তত্রাপ্যশক্তৌ প্রথমমাসস্য একাহ এব দ্বাদশমাসিকসহিত সপিণ্ডীকরণকালঃ। মাসিকস্য তু প্রতিমাস
মৃতাহো মুখ্যকল্পঃ তদশক্তৌ মাসদ্বয়ং প্রতি অত্র কল্পে ষষ্ঠমাসিকদিনে পঞ্চম মাসিকং ন্যূনমাসিকঞ্চ কৃত্বা ষষ্ঠমাসিকং কার্য্যং।
তদাদিতদনুন্যায়াৎ ন পূর্ব্বদিনে ব্যুৎক্রমাপত্তেঃ ন তু পঞ্চমমাসিকমপি পূর্ব্বদিনে মৃততিথ্যভাবাৎ॥ * ॥ * ॥

অথ সপিণ্ডীকরণং। স্নানাদিকৃতনিত্যক্রিয়ঃ শেষমাসিকং কৃত্বা অপরাহ্নে রাক্ষসীবেলেতরত্র প্রথমং তিলতৈলেন দীপং প্রজ্বাল্য
ওঁ বাস্তুপুরুষায় নমঃ ইতি বাস্তুং সংপূজ্য যজ্ঞেশ্বরঞ্চ সম্পূজ্য তস্মৈ শ্রাদ্ধীয়াগ্রভাগং দত্ত্বা পরকীয়ভূমৌ চেৎ তৎস্বামিনে
মূল্যথবা পিতৃরীত্যা ওঁ এতদ্ভূস্বামিপিতৃভ্যঃ স্বধেতি দদ্যাৎ। ততো দেবপিতামহাদীনাং পার্ব্বণং প্রেতস্যৈকোদ্দিষ্টবিধিনা শ্রাদ্ধং
কর্ত্তব্যম্। তত্র দৈবে পূর্ব্বাগ্রদর্ভদ্বিতয়যুক্তাসনদ্বিতয়ে দর্ভবটুদ্বয়ং নিধায় পিতামহাদিপক্ষে দক্ষিণাগ্রযুক্তাসনত্রিতয়ে দর্ভবটুত্রয়ং
নিধায় তৎপূর্ব্বদিশি প্রেতপক্ষে দক্ষিণাগ্রৈকদর্ভযুক্তৈকাসনে দর্ভবটুং নিধায় দৈবে জলং দত্ত্বা ওঁ অদ্যামুকে মাস্যমুক পক্ষে হমুক
তিথৌ অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ সপিণ্ডীকরণার্থং অমুক গোত্রস্য পিতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য প্রপিতা-
মহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য বৃদ্ধপ্রপিতামহস্যামুক দেবশর্ম্মণঃ পার্ব্বণবিধিনা শ্রাদ্ধে কর্ত্তব্যে ওঁ পুরূরবো মাদ্রবসোর্বিশ্বেষাং ১১০
দেবানাং পার্ব্বণবিধিনা শ্রাদ্ধং দর্ভময় ব্রাহ্মণয়োরহং করিষ্যে। ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেতি প্রতিবচনম্। ততঃ পিতামহাদি পক্ষে জলং
দত্ত্বা ওঁ অদ্যামুকে মাসি অমুক পক্ষে হমুক তিথৌ অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ সপিণ্ডীকরণার্থং অমুক গোত্রস্য পিতামহস্যা-
মুক দেবশর্ম্মণঃ অমুক গোত্রস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য বৃদ্ধপ্রপিতামহস্যামুক দেবশর্ম্মণঃ পার্ব্বণবিধিনা শ্রাদ্ধং
দর্ভময় ব্রাহ্মণেষ্বহং করিষ্যে ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেতি প্রতিবচনম্। ততঃ প্রেতপক্ষে জলং দত্ত্বা ওঁ অদ্যামুকে মাস্যমুক পক্ষে হমুক
তিথৌ অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ সপিণ্ডীকরণৈকোদ্দিষ্টশ্রাদ্ধং দর্ভময় ব্রাহ্মণে হহং করিষ্যে। ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেতি
প্রতিবচনম্। ততো দৈবাদিক্রমেণ সপ্রণবব্যাহৃতিকাং গায়ত্রীং জপ্ত্বা ওঁ দেবতাভ্যঃ পিতৃভ্যশ্চ মহাযোগিভ্য এব চ। নমঃ

কর্ম্ম প্রবচনীয়ত্বাৎ। (২) ততো যববিকীরণানন্তরং অবকীর্য্য বিশ্বেদেবাঃ শৃণুতেতি জপেদিতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ বিশ্বেদেবাঃ শৃণুতেমং হবং যে যে অন্তরীক্ষে য উপ-দ্যবিষ্ঠ যে অগ্নিজিহ্বা উত বা যজত্রা আসাদ্যাস্মিন্ বর্হিষি মাদয়ধ্বম্। অস্যার্থঃ। হে বিশ্বেদেবাঃ যে মম ইমং হবং আহ্বানং শৃণুত কিম্ভূতা যূয়ং অন্তরীক্ষে আকাশে স্থ তিষ্ঠত তথা যে উপ সমীপে পৃথিব্যাং তিষ্ঠত দ্যবি স্বর্গে যে তিষ্ঠতেতি সম্বন্ধঃ। দ্যবিষ্ঠেতি ছান্দসত্বাৎ যত্বম্। এতদুক্তং ভবতি। ভূমাবাকাশে স্বর্গে চাবস্থিতা যে বিশ্বেদেবাঃ। কে তে অগ্নিজিহ্বাঃ অগ্নিরেব জিহ্বা হুতভোজনসাধনং যেষাং তে তথোক্তাঃ উত বা অপ্যর্থে যে যজত্রাঃ যজন্তং শ্রাদ্ধকর্ত্তারং ত্রায়ন্ত ইতি যজত্রাঃ। পুরূরবোমাদ্রবঃ প্রভৃতয়ঃ যূয়ং আস্থতে কুশে আসাদ্য মাদয়ধ্বং হর্ষযুক্তা ভবতেত্যর্থঃ। (৩) ওঁ ওষধয়ঃ সমবদন্তঃ সোমেন সহ রাজ্ঞা যস্মৈ কৃণোতি ব্রাহ্মণস্তং রাজন্ পারয়ামসি। অস্যার্থঃ। হে বিশ্বে-

বিকীরেৎ। কৃতাঞ্জলিঃ। ওঁ বিশ্বেদেবাঃ শৃণুমেতং হবং যে যে অন্তরীক্ষে য উপদ্যবিষ্ঠ যে অগ্নিজিহ্বা উত বা যজত্রা আসাদ্যাস্মিন্ বর্হিষি মাদয়ধ্বম্ [ ২ ]। ওঁ ওষধয়ঃ সমবদন্তঃ সোমেন সহ রাজ্ঞা যস্মৈ কৃণোতি ব্রাহ্মণস্তং রাজন্ পারয়ামসি [ ৩ ]। ইতি জপেৎ। ততো দক্ষিণামুখঃ পাতিতবামজানুঃ প্রাচীনাবীতী পিতৃপক্ষে তিলান্ ওঁ পিতনাবাহয়িষ্যে ইতি পৃচ্ছেৎ। ওঁ আবা-হয় ইত্যুত্তরম্। ওঁ এত পিতরঃ সৌম্যাসো গম্ভীরেভিঃ পথিভিঃ পূর্ব্বিণেভির্দত্তাস্মভ্যং দ্রবিণেহ ভদ্রং রৈঞ্চ নঃ সর্ব্ববীরং নিযচ্ছত [ ৪ ]। 

দেবাস ন কেবলং যূয়মেব হর্ষযুক্তাঃ কিন্তু ভবদধিষ্ঠানযুক্তমাত্মানং বহুমন্যমানা ওষধয়ঃ কুশাঃ সোমেন সহ রাজ্ঞা সহাসীনাঃ সমবদন্ত স্থিরীভূতাঃ যতঃ সোমঃ ওষধীনামধি-পতিঃ। কিঞ্চ হে সোম রাজন্ ত্বং ব্রাহ্মণো হসি ভবসি অতো যস্মৈ ব্রাহ্মণায় শ্রাদ্ধভোক্তৃত্বেনোকল্পিতায় আসনং কুশাস্তরেণ সম্বন্ধং কৃণোতি দধাতি তং ব্রাহ্মণমপি আঃ সর্ব্বতো ভাবেন পালয় শ্রাদ্ধভোজনকৃতপাপমোচয় ইত্যধ্যাহার্য্যং কৃণোতীতি বিভক্তিব্যত্যয়ে মধ্যমে প্রথমপুরুষঃ তিঙাং তিঙিতি স্মরণাৎ। আমিতি অব্যয়ানামনেকার্থত্বাৎ সর্ব্বতো ভাবেহপি দ্রষ্টব্যম্। এতজ্জপানন্তরম্। পিতৃনাবাহয়িষ্যে ইতি কাত্যায়নঃ। ( ৪ ) মন্ত্রো যথা। এত পিতরঃ সোম্যাসো গম্ভীরেভিঃ

পথিভিঃ পূর্ব্বিণেভির্দত্তাস্মভ্যং দ্রবিণেহ ভদ্রং রৈঞ্চ নঃ সর্ব্ববীরং নিযচ্ছত। অস্যার্থঃ। হে পিতরঃ পিতৃপিতামহ প্রপিতামহ মাতামহ প্রমাতামহ বৃদ্ধপ্রমাতামহ-প্রভৃতয়ো হস্মিন্নাস্তৃতে বর্হিষি এত আগচ্ছত কিম্ভূতা যূয়ং সোম্যাসো সোমো দেবতা যেষাং ইতি সোম্যাসঃ সোমাস ইতি টাণ সৌমা পূর্ব্ববজ্জসেরসুগাগমঃ। কৈরাগমনমিত্যাকাংক্ষায়ামাহ। পথিভিরিতি কিম্ভূতৈঃ গম্ভীরেভিঃ গম্ভীরৈর্দেবাদীনাং প্রসিদ্ধবর্ত্মভিরিত্যর্থঃ। পুনঃ কিম্ভূতৈঃ পূর্ব্বিণেভিঃ পূর্ব্ব পুরুষাণাং কব্য-বাহনাদীনাং গমনাগমনপ্রসিদ্ধবর্ত্মভিরিত্যর্থঃ। আগত্য চ নো হস্মাকং ভদ্রং কল্যাণং দ্রবিণে ক্রমাগতধনে চ দত্ত কুরুত হ ইতি সম্বোধনবাচকঃ। ন কেবলং লব্ধবিত্তে কিঞ্চ রৈঞ্চ লভ্যরূপং ধনঞ্চ যৎ তৎ সর্ব্বং নিযচ্ছত। রৈমিতি ছান্দসত্বাৎ নিরুক্ত লক্ষণেন আমোহকার লোপঃ। কিম্ভূতং ধনং সর্ব্ববীরং সর্ব্ববীরমিতি ব্যত্যয়েন জসো অম্ সর্ব্বেষাং বীরাণাং শৌর্য্যাদিযুক্তানাং যৎ প্রার্থনীয়ং তদপি প্রযচ্ছত ইত্যাশংসাবাক্যার্থঃ। পূর্ব্বিণেভিরিতি পূর্ব্বশব্দাদ্বহুলং ঔণাদিক ইন প্রত্যয়ঃ

ওঁ উশন্তস্ত্বা নিধীমহ্যুশন্তঃ সমিধীমহি উশন্নুশত আবহ পিতৃন্ হবিষে অত্তবে [৫]। ইত্যাবাহ্য কৃতাঞ্জলিঃ। ওঁ আয়ান্তু নঃ পিতরঃ সোম্যাসো হগ্নিষ্বাত্তাঃ পথিভির্দেবযানৈঃ। অস্মিন্ যজ্ঞে স্বধয়া মদন্তো হধিব্রুবন্তু তে হবন্ত্বস্মান্ [৬]। ইতি জপ্ত্বা ওঁ অপহতাসুরা রক্ষাংসি বেদিষদ ইতি তিলান্ বিকীরেৎ। ততঃ প্রেতপক্ষে ওঁ অপহতা ইত্যাদিনা ১১৬

ছান্দসত্বাৎ অকারলোপে ন সন্ধিঃ। লক্ষণান্তরোধান্ন বৃদ্ধিঃ ছন্দসাং ভিস্ ঐশাদেশবাধাদেত্বং গম্ভীরেভিরিতি বহুলং ছন্দসীতি ঐস্ ন ভবতি। (৫) উশন্তস্ত্বা ইত্যাবাহয়েদিতি কাত্যায়নঃ। মন্ত্রো যথা উশন্তস্ত্বা নিধীমহ্যুশন্তঃ সমিধীমহি উশন্নুশত আবহ পিতৃন্ হবিষে অত্তবে। অস্যার্থঃ। অত্রাগ্নিরিত্যধ্যাহার্য্যম্। হে অগ্নে ত্বা ত্বাং নিধীমহি আদধীমহি আধানং তব কুর্ম্ম ইতি যাবৎ বয়মিত্যধ্যাহার্য্যম্। কিম্ভূতা বয়ং ত্বামুশন্তঃ ইচ্ছন্তঃ কিঞ্চ ন কেবলং উশন্ত এব বয়ং ত্বাং সমিধীমহি প্রজ্বালয়ামঃ ত্বঞ্চ অস্মাভিরাহিতো জ্বলিতঃ সন্ পিতৃন্ অগ্নিষ্বাত্তাদীন্ আবহ আবাহয় কিম্ভূতস্ত্বং উশন্ পিতৃন্ ইচ্ছন্। কিম্ভূতান্ পিতৃন্ উশতঃ ইচ্ছতঃ। কিমর্থমাবাহন-মিত্যাহ অস্মদ্দত্তস্য হবিষে হত্তবে অদনার্থং। অত্তবে ইতি অদেরৌণাদিকস্তুন্ প্রত্যয়ঃ হবিষ ইতি ষষ্ঠ্যর্থে চতুর্থী বিভক্তিব্যত্যয়াৎ। হে অগ্নে আধানপ্রজ্বলনাভ্যাং আরা-ধিতস্ত্বং পিতৃন্ অস্মাকং শ্রাদ্ধদেয়স্য হবিষো ভক্ষণার্থং আবহ আনয় ইত্যর্থঃ। (৬) আবাহনানন্তরং অবকীর্য্য আয়ান্তু নো জপেদিতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ

আয়ান্তু নঃ পিতরঃ সোম্যাসো অগ্নিষ্বাত্তাঃ পথিভির্দেবযানৈরস্মিন্ যজ্ঞে পুষ্ট্যা মদন্তোঽধিব্রুবন্তু তে ঽবন্ত্বস্মান্। অস্যার্থঃ। নোঽস্মাকং পিতর আয়ান্তু আগচ্ছন্তু কিম্ভূতাঃ সোম্যাসঃ সোম্যা—সোমপাখ্যাঃ সোমাট্যেন লক্ষণাস্বরোধায় ত্বক্কিঃ সোম্যাস ইতি বা পাঠঃ শাখান্তরীয়ঃ। ন কেবলং সোম্যা এব পিতরঃ অগ্নিষ্বাত্তাঃ শ্রৌতস্মার্ত্তাদিভিরগ্নিভিঃ ষ্বাত্তাঃ অনগ্নিদগ্ধানামত্রাধিকারো নাস্তীতি। সংস্কৃতাঃ যে পিতর ইত্যর্থঃ। শ্রৌতস্মার্ত্তাদিভিরগ্নিভিঃ সংস্কারঃ কৃতঃ ইত্যর্থঃ। কৈরা-

তিলান্ বিকীরেৎ। ততো জলং স্পৃষ্ট্বা দৈবে উত্তরামুখঃ কুশপত্রমেকং ভূমৌ পাতয়িত্বা তদুপরি পাত্রমেকং স্থাপয়িত্বা দক্ষিণামুখঃ পিতামহাদিব্রাহ্মণাগ্রতঃ সমূলকুশপত্রমেকং দক্ষিণাগ্রং পাতয়িত্বা তদুপরি মূলমধ্যাগ্রেষু পাত্রত্রয়ং স্থাপয়েৎ। এবং প্রেতপক্ষ ব্রাহ্মণাগ্রতঃ সমূলং কুশপত্রমেকং দক্ষিণাগ্রং পাতয়িত্বা তদুপরি পাত্রমেকং স্থাপয়েৎ। ততঃ ওঁ পবিত্রে স্থো বৈষ্ণব্যাবিত্যনেনানখচ্ছিন্নং প্রাদেশমাত্রং দ্বিদলং পবিত্রং ওঁ বিষ্ণোর্মনসা পূতে স্থ ইত্যনেন প্রোক্ষিতং দৈবাদি পাত্রচতুষ্টয়ে একৈকং বিন্যস্য এবং প্রেতপক্ষে কুশপত্রমেকং প্রাদেশমাত্রং সাগ্রং পবিত্রং ওঁ পবিত্রমসি বৈষ্ণবীত্যনেনানখচ্ছিন্নং ওঁ বিষ্ণোর্মনসা পূতমসীত্যনেন প্রোক্ষিতং প্রেতপাত্রে বিন্যস্য তেষু দৈবাদিক্রমেণ ওঁ শন্নো দেবীরভিষ্টয়ে শন্নো ভবন্তু পীতয়ে শংযোরভি স্রবন্তু নঃ (৭) ইত্যনেন প্রত্যেকং জলং দদ্যাৎ। ততো দৈবে ওঁ যবোঽসি যবয়াস্মদ্দ্বেষো যবয়ারাতীর্দিবে ত্বা অন্তরী-

গচ্ছন্তু পথিভিবর্ত্মভিঃ। কিম্ভূতৈর্দেবযানৈর্দেবানাং যানং গমনং যৈর্বর্ত্মভিস্তৈরাগত্য তে পিতরো ঽস্মিন্ শ্রাদ্ধরূপে যজ্ঞকর্ম্মণি অস্মান্ অধিব্রুবন্তু শ্লাঘয়ন্তু ইত্যর্থঃ। কিম্ভূতাস্তে মদন্তঃ তৃপ্যন্তঃ কয়া পুষ্ট্যা। ন কেবলং অধিব্রুবন্তু কিন্ত্ববন্তু রক্ষন্তু চ তেঽস্মানিত্যাশংসাবাক্যার্থঃ। (৭) ততঃ পাত্রেষু জলং দদ্যাৎ শন্নো দেবীরীতি

কাত্যায়নঃ। মন্ত্রো যথা। শন্নো দেবীরভিষ্টয়ে শন্নো ভবন্তু পীতয়ে শংযোরভিস্রবন্তু নঃ। অস্যার্থঃ। এতা অধ্যার্থমুপকল্পিতা আপো নো ঽস্মাকং শং কল্যাণপ্রদা ভবন্তিত্যর্থঃ। কিম্ভূতা আপঃ দেবীর্দ্দেব্যঃ দেবনাদিগুণযুক্তাঃ কিমর্থমভিষ্টয়ে উপচরার্থং পীতয়ে পানার্থং অভীষ্টয় ইত্যর্থে ছান্দসত্বাৎ হ্রস্বঃ। কিঞ্চ নো ঽস্মাকং শংযোঃ কল্যাণসংযোগায় অভিস্রবন্তু অভিমুখা ভবন্তু ইত্যাশংসাবাক্যার্থঃ। শংযোরিতি চতুর্থ্যর্থে ষষ্ঠী। দেবীরিতি সুপাং সুপ ইতি জসস্থানে শস্ বিভক্তি-ব্যত্যয়াৎ। (৮) ততো দৈবে যবান্ বিকীরেদিতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ যবোঽসি যবয়াস্মদ্দ্বেষো যবয়ারাতীর্দ্দিবে ত্বা অন্তরীক্ষায় ত্বা পৃথিব্যৈ ত্বা শুন্ধন্তাং লোকাঃ পিতৃসদনাঃ পিতৃসদনমসি। অস্যার্থঃ। ত্বং যবোঽসি ভবসি যতস্তদস্মদ্দ্বেষো ঽস্মদুপজাতশত্রূন্ যবয় পৃথক্ কুরু সংহতিরহিতান্ কুরু ইত্যর্থঃ। ন কেবলং দ্বেষ এব

ক্ষায় ত্বা পৃথিব্যৈ ত্বা শুন্ধন্তাং লোকাঃ পিতৃসদনাঃ পিতৃসদনমসি ইতি যবান্ বিকীরেৎ [ ৮ ]। ততঃ পিতামহাদিপাত্রেষু ৩৩৮

ওঁ তিলোঽসি সোমদেবত্যো গোসবো দেবনির্ম্মিতঃ। প্রত্নমদ্ভিঃ পৃক্তঃ স্বধয়া পিতৄন্ লোকান্ প্রীণাহি নঃ স্বাহেতি [ ৯ ]।

কিন্তু অরাতীঃ সহজশত্রূন্ যবয় অসংহতান্ কুরু। বেদে অরাতিশব্দঃ স্ত্রীলিঙ্গোঽপি যতস্ত্বং পৃথক্শরীরো অতো ঽস্মাকং শত্রূন্ পৃথক্ কুরু। দ্বেষঃ কৃত্রিম শত্রুঃ। তথা চ দ্বেষঃ কৃত্রিমশত্রৌ স্যাদরাতিঃ সহজে স্ত্রিয়ামিত্যভিধানকাণ্ডম্। ঽহন্নাপমিনী যুমিশ্রণে যবয় ইতি পচাদ্যচি কৃতে তৎ করোতি তদাচষ্ট ইতীন্ দ্বেষ ইতি দ্বিষ ইত্যর্থে ছান্দস একারঃ ত্বা ত্বাং অন্তরীক্ষায় নভোগতায় দিবে স্বর্গগমনায় পৃথিব্যৈ পৃথিবীলাভায় রাজ্যপ্রাপ্তয়ে ত্বামুপাস্মহে ইত্যর্থঃ। কিন্তু হে যব। ত্বয়া শত্রুক্ষয়াদিরূপেণ উপকৃতা লোকাঃ কব্যবাহনাদিরূপাঃ শুন্ধন্তাং শুদ্ধিভাবা ভবন্তু কিম্ভূতাঃ পিতৄণাং সদনং ভবনমাপন্নাঃ পিতৃলোকমাপন্না ইত্যর্থঃ। কিন্তু হে যব। ত্বমপি পিতৃসদনমপি পিতৄণাং ভবনং ভবসীতি যতঃ অতঃ শত্রূন যবয়েত্যর্থঃ। (৯) ওঁ তিলোঽসি সোমদেবত্যো গোসবো দেবনির্ম্মিতঃ প্রত্নমদ্ভিঃ পৃক্তঃ স্বধয়া পিতৄন্ লোকান্ প্রীণাহি নঃ স্বাহা।

অন্বয়ার্থঃ। তিলস্ত্বমসি কিম্ভূতঃ সোমদেবতাঃ সোমো দেবতা অস্যেতি দেবতার্থে যদপি রূঢ়িতঃ ক্বচিদধিকারাম্ন বৃদ্ধিঃ। পুনঃ কীদৃশঃ গোসবঃ গাং স্বর্গং সূতে দদাতি গোসবঃ যতস্তিলো ময়ং দত্তঃ সন্ দাতুঃ পাপাপনয়নানন্তরং স্বর্গপ্রাপ্তিঃ স্যাৎ। অপি কীদৃশঃ দেবনির্ম্মিতঃ দেবেন বিষ্ণুনা নির্ম্মিতঃ। তথা চ শ্রুতিঃ বিষ্ণুদেহোদ্ভবাঃ পুণ্যাস্তিলা ইতি। পুনঃ কীদৃশঃ অদ্ভিঃ পৃক্তঃ জলমিশ্রিতঃ যত এবম্ভূতস্ত্বং তদস্মাকং পিতৄন্ লোকান্ পিতৃপিতামহ প্রপিতামহ প্রভৃতীন্ প্রত্নং চিরকালং যথা স্যাত্তথা

তিলান্ বিকীরেৎ। ততঃ প্রেতপাত্রে পিতৄনিতি স্থানে প্রেতানিত্যূহেন তিলান্ দদ্যাৎ। ততো দৈবাদিক্রমেণ সর্ব্ব-পাত্রেষু তূষ্ণীং গন্ধপুষ্পে দত্ত্বা কুশান্তরেণাচ্ছাদ্য দৈবে ওঁ অচ্ছিদ্রমিদমর্ঘ্যপাত্রমস্তু ইতি ব্রূয়াৎ। ওঁ অস্ত্বিতি ব্রাহ্মণৈরুক্তে কুশান্তরং প্রক্ষিপ্য দেবব্রাহ্মণহস্তে প্রাগগ্রং পবিত্রং দত্ত্বা জলান্তরং পুষ্পান্তরঞ্চ দত্ত্বা পুষ্পান্তরেণ শিরঃ প্রভৃতি সর্ব্বগাত্রে-ভ্যো নম ইতি সম্পূজ্য তৎপাত্রং বামহস্তে কৃত্বা দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা আপঃ পয়সা সংবভূবুর্যা অন্তরীক্ষা উত-পার্থিবীর্যা হিরণ্যবর্ণা যজ্ঞিয়াস্তা ন আপঃ শিবাঃ শংস্যোনাঃ সুহবা ভবন্তু [১০] ওঁ পুরূরবোমাদ্রবসৌ বিশ্বেদেবা এতদ্বোঽর্ঘ্যং ৩০৯

স্বধয়া স্বধাকারেণ প্রীণাহি প্রীতান্ কুরু। প্রীণাহীতি ছান্দসত্বাদীকারো ন ভবতি। যদ্যপি পিতৃকর্ম্মণি স্বাহাকারো ন যুক্তস্তথাপি কাত্যায়নেন মহর্ষিণা স্বাহাকারেণ মন্ত্রস্য পঠিতত্বাৎ ন কাচিদনুপপত্তিরাশঙ্কনীয়া। প্রত্নমিতি কশ্চিদব্যয়মিত্যাচষ্টে। পরমার্থতস্তু প্রযত্নশব্দস্য নিপাতনাদ্বহুলং যলুগিতি যলুক প্রযত্নমিতি প্রযত্নং যথা স্যা-দিতি তথাচাভিধানকাণ্ডস্ চিরকালে প্রযত্নে চ প্রত্নমিত্যভিধীয়তে। (১০) একৈকস্য একৈকেন দদাতীতি কাত্যায়নঃ। ওঁ যা দিব্যা আপঃ পয়সা সংবভূবুর্যা অন্তরীক্ষা উত